BENARES SANSKRIT SERIES;

A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH, M. A., C. I. E.
AND
G. THIBAUT, PH. D.
No. 96.

बोधसारः ।

श्रीविद्वद्वर्यनरहरिविरचितः ।

तच्छिष्यश्रीदिवाकरकृतयाऽर्थदीप्त्या सहितः ।

श्रीमदुदासीनवर्यस्वामिगोविन्दानन्दशिष्येण
दयानन्दस्वामिना परिशोधितः ।

BODHSÂR,

A TREATISE ON VEDANTA,
BY
SRI NARHARI,
With a commentary by the author's pupil
PANDIT DIVÂKAR.
EDITED BY
SWÂMÎ DAYÂNAND.
Fasciculus IV.

BENARES.
Published by the Proprietors Messrs. Braj B. Das & Co.,
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ vilâs Press,
BENARES.

1905.

सूचीपत्रम् ।

[illegible]	०	४	०
[illegible]	२	८	०
[illegible]	०	६	०
[illegible]	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली	०	२	६
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठः	०	१	०
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
भट्टीकाव्य ५ सर्ग	०	६	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
वार्तिकपाठः	०	४	०
विष्णुसहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	४	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	१	०

योगनिद्रेति सा प्रोक्ता परा काष्ठेति सा स्मृता।
अनुत्तरं च सहजं स्वरूपस्थितिरित्यपि ॥ २ ॥

योगनिद्रेति। सैव सप्तम्येव योगनिद्रेत्येवं नाम्ना पुराणेषूक्ता कथिता तथा सा सप्तम्यवस्था परा श्रेष्ठा काष्ठा स्थितिरित्येवं नाम्ना स्मृता चिन्तिता मुनिभिरितिशेषः, सहजं स्वाभाविकमनुत्तरं नोत्तरं प्रतिवाक्यं यस्मिंस्तत्तथोक्तं सहजानुत्तरनाम्न्यपि सैवोच्यत इत्यर्थः, तथा स्वरूपस्थितिः स्वेनैव रूप्यते प्रकाश्यत इति स्वरूपा सा चासौ स्थितिरवस्थेत्येवं नाम्नापि सोक्ता कथिता ॥ २ ॥

अत एवास्या निरूपणाविषयत्वरूपं लक्षणमाह।

मौनमेवावलम्बन्ते यस्यां हरिहरादयः।
सा तु वर्णयितुं शक्या न केनापि कदाचन ॥ ३ ॥

मौनमिति। यस्यां सप्तमभूमिकायामारूढाः सन्तो हरिहरादयो हरिर्विष्णुर्हरः शिव आदी प्रमुखौ येषां ब्रह्मेन्द्रप्रभृतीनां ते सर्वेऽपि मौनमेव मननफलभूतं स्वप्रकाशात्मस्वरूपं चिन्मात्रमेव केवलमवलम्बन्त आश्रयन्ते न तु वागादिव्यापारं किञ्चिदपि कुर्वन्तीति भावः, कुत इत्यत आह सात्विति, सा तु सा सप्तमी भूमिका तुपदेनास्याः पूर्वभूमिकाभ्यो वैलक्षण्यं श्रेष्ठत्वं च सूचितं, तदेवाह केनापि, सर्ववेदयोनिना ब्रह्मणापीदं चोपलक्षणं हरिहरादीनां, कदाचन कस्मिन्नपि काले वर्णयितुं वर्णनविषयीकर्तुं न शक्या न संभाव्या, इदं च लक्षणं सप्तम्या ज्ञेयम् ॥ ३ ॥

सप्तम्यारूढस्य बोधेऽपि निरपेक्षरूपत्वे लक्षणान्तरमाह।

चिदङ्गे कोमले लग्नो दैवादज्ञानकण्टकः।

तं बोधकण्टकेनायं विनिवार्य सुखं स्थितः ॥ ४ ॥

चिदङ्ग इति । कोमल ईषदप्यज्ञानकण्टकासहे चिदङ्गे चिन्मात्ररूपेऽङ्गे स्वरूपे दैवात्काकतालीयतोऽज्ञानकण्टको-ऽज्ञानमेव दुःखप्रदत्वात्कण्टक इव कण्टको लग्नः स्पृष्टोऽयं सप्तम्यारूढः पुरुषो बोधकण्टकेन बोधस्तत्त्वमस्यादिवाक्यजन्यं संशयविपर्ययरहितमहं ब्रह्मास्मीत्याकारकमपरोक्षं ज्ञानं जीवब्रह्मैक्यविषयं स एवाज्ञानलक्षणकण्टकनिष्कासनोपयोगात्कण्टकसादृश्यात्कण्टकस्तेन तमज्ञानकण्टकं विनिवार्य निष्कास्य सुखं यथा भवति तथा स्थितस्तिष्ठतीत्यर्थः, सप्तम्यारूढस्याज्ञानमिव ज्ञानमप्यनादरणीयमेतदपि लक्षणान्तरं सप्तम्यारूढस्येति भावः ॥ ४ ॥

इदानीं सप्तम्यारूढस्य स्थितिं वर्णयति त्रिभिर्वृत्तैः ।

अमृतजलधौ यस्मिन्वार्ता न मीनतरंगयो-

र्न च परिचयः पारावारस्थितेरपि कुत्रचित् ।

समरसपरब्रह्मानन्दप्रणुन्नविकल्पनः

सहजगलितद्वैतज्वालः स भाति महामुनिः ॥ ५ ॥

अमृतेति । यथा कस्मिंश्चिद्यस्मिन्विलक्षणे प्रलयवृद्धेऽमृतजलधावमृतमिव मिष्टं जलमुदकं धीयते ध्रियते यस्मिन्निति अमृतजलधिस्तस्मिन्मीनतरङ्गयोर्मीनो मत्स्यस्तरङ्ग ऊर्मिस्तयोर्वार्ता वृत्तान्तः समुद्रस्यागाधत्वेन नास्ति च पुनः कुत्रचित्कस्मिन्नपि भागे तस्मिन्समुद्रे पारावारस्थितेरपि पारा परतरा अवारा अर्वाचीना स्वदृग्गोचरा स्थितिः स्थानं तस्याः परिचयोऽपि अनुभवोऽपि न च नैव विद्यते केवलं तत्र समरसपरब्रह्मानन्दप्रणुन्नविकल्पनः सम एकरूपो रसः सुखं यत्र स चासौ परं का-

र्यकारणातीतं ब्रह्म देशादिभिरपरिच्छिन्नं भूमापरपर्यायं तद्रूप आनन्दश्च सुखं तेन कृत्वा प्रणुन्नं निवारितं बाधितमित्यर्थः, विकल्प्यते विपरीतत्वेन भाव्यतेऽनेनेति विकल्पनमज्ञानं कारणकार्योभयरूपं येन स तथाविधो विकल्पनमित्यत्र करणेल्युट् अत एव सहजगलितद्वैतज्वालः सहजं स्वभावेनैव गलिता नष्टा द्वैतं नानात्वमेव ज्वालेव तापहेतुत्वाज्ज्वाला यत्र स तथोक्तः स पुराणादौ प्रसिद्धो महामुनिर्ब्रह्मा भाति प्रकाशते स्वयमेवेत्यर्थः, प्रस्तुतार्थे तु यथाऽमृतं सुखमेव समुद्रे जलमिव पूर्णं धीयते ध्रियते यत्र सोऽमृतजलधिरिति मुनिविशेषणं, यद्वा—अमृतं सुखं जडमचलं स्थिरमित्यर्थः, डलयोरभेदाद्धीयते ध्रियतेऽस्मिन्निति स तथोक्तः स्थिरसुखाधारत्वेनोपलक्षित इत्यर्थः, यस्मिंश्च महामुनौ मीनतरङ्गयोर्मीनो मीयत आध्रियत इति मीनो जीवः शिष्यभावापन्नस्तरन्तारकं वाक्यजातं गायति उपदिशतीति तरङ्गो महावाक्योपदेष्टा वेदोच्चारकश्चेश्वरो गुरुभावापन्न ईश्वरश्चेत्यर्थः, तयोर्वार्ता कथनं न न विद्यते च पुनर्यस्मिन्कुत्रचित्कस्मिन्नपि काले देशे वा पारवारस्थितेः पारा कारणरूपा निर्गुणा वाऽवारा कार्यरूपा सगुणा वा या स्थितिरवस्था तस्याः परिचयो भानमपि न च न विद्यते तत्र हेतुः समरसपरब्रह्मानन्दप्रणुन्नविकल्पनः सम एकरूपो रसः सुखं यस्मिन्स चासौ परब्रह्मानन्दः कार्यकारणहीनं भूमशब्दवाच्यं सुखं तेन कृत्वा प्रणुन्नं विकल्पनं विकल्पकारणमज्ञानं येन स तथोक्तोऽत एव सहजगलितद्वैतज्वालः सहजं स्वाभाविकं यथा तथा गलिता नष्टा द्वैतं भेद एव तापकत्वाज्ज्वालेव ज्वाला यस्मिन्स सप्तम्यारूढो महामुनिर्मुनिश्रेष्ठो भाति प्रकाशते, इदं च सप्तमीलक्षणं ज्ञेयम् ॥ ५ ॥

किञ्च ।

बंधध्वंसमभीप्सुना सुमनसा जिज्ञासया तीव्रया ।
ज्ञाते ब्रह्मणि बाधिताक्षविषये बोधे चमत्कुर्वति ।
स्वान्तर्मन्तृविमानमान्यविवृतिव्यावृत्तिनिर्भङ्गको
भाति ज्ञानसुखात्मकः स्वयमयं योग्यापगानां पतिः॥ ६॥

बन्धेति । बन्धध्वंसं बन्धयतिं अवरोधयति नित्यमुक्तमप्यात्मानमिति बन्धोऽज्ञानं तस्य ध्वंसो नाशस्तमभीप्सत इत्यभीप्सुरिच्छवांस्तेन सुमनसा साधनसंपन्नं यन्मनस्तेन कर्त्रा तीव्रया दृढया जिज्ञासया ज्ञानेच्छया करणभूतया ब्रह्मणि अपरिच्छिन्नात्मवस्तुनि ज्ञाते साक्षादनुभूते सति ततो बाधिताक्षविषये बाधिता निरस्ता अक्षविषया इन्द्रियगोचरा यस्मिन्स तथोक्तस्तस्मिन्बोधे ज्ञाने चमत्कुर्वति सर्वदा प्रकाशमाने सति स्वान्तः स्वेऽन्तःकरणे मन्तृविमानमान्यविवृतिव्यावृत्तिनिर्भङ्गको मन्ताऽधिष्ठानसहितबुद्धिस्थचिदाभासः प्रमाता विपरीतं मन्यतेऽनेनेति विमाना मतिः करणे घञ् मान्यं मन्तव्यमेतत्त्रिपुटीरूपा या विवृतिर्भ्रान्तिस्तस्या व्यावृत्तिर्निवृत्तिस्तया कृत्वा निर्भङ्गको निस्तरङ्गो विक्षेपरहित इत्यर्थः, अत एव ज्ञानसुखात्मको ज्ञानं बोधस्तदभिन्नं सुखमानन्दः स एवात्मा स्वरूपं यस्य स तथोक्तः स्वयं स्वतः सिद्धोऽयं सप्तम्यारूढो योग्यापगानां योगिनोऽत्र पूर्वभूमिकाषट्कस्थिता ग्राह्यास्त एवापगा नद्य इव नद्यस्तेषामुत्तरोत्तरभूमिकासु वृत्तेर्नदीत्व सन्ततगमनवत्त्वान्नदीत्वं तासां पतिः पालकः आसमन्तात्सर्वेषां पालकत्वं सप्तम्यारूढस्य स उक्तलक्षणो भाति स्वयं प्रकाशरूपेण विराजते ॥ ६ ॥

किञ्च।

वाचा मौनमयी गतिः स्थितिमयी निद्रामयो जागरो
निद्रा बोधमयी निशा दिनमयी नक्तंमयो वासरः।
कर्म ब्रह्ममयं जगत्सुखमयं किञ्चिन्न किञ्चिन्मयं
दुर्लङ्घ्यं गुणवर्त्म लङ्घितवतो वार्त्ता कथं वर्ण्यताम्॥७॥

वाचेति। दुर्लङ्घ्यं दुःखेनातियत्नेन लङ्घितुं योग्यं दुर्लङ्घ्यं गुणवर्त्म गुणानां सत्त्वरजस्तमसां वर्त्म मार्गं लङ्घितवतोऽतिक्रान्तवतः सप्तम्यारूढस्य वार्त्ता वृत्तान्तः कथं केन प्रकारेण वर्ण्यतां वर्णनीया न केनापि प्रकारेण वर्णनीया, उक्तमवर्णनीयत्वमेव विशदयति वाचेत्यादिविशेषणैः तस्य वाचा वाणी मौनमयी मौनरूपा भवति 'नेह नानास्ति किञ्चने'ति श्रुत्या सर्वशब्दवाच्यप्रपञ्चस्य बाधितत्वाद्वक्तृवचनवाच्यरूपप्रपञ्चमिथ्यात्वेन 'यद्वैतन्न वदति वदन्वै तन्न वदति न हि वक्तुर्वक्तेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोन्यद्विभक्तं यद्वदेदि'ति श्रुत्या वचनस्य वक्तुः स्वरूपत्वप्रतिपादनात्ततः पृथगसत्त्वप्रतिपादनाच्च वाच्यस्यापि पृथगसत्वाच्च वागभावेन लोके प्रतीयमानाया वाचोपि पारमार्थिकत्वाभावाच्च तस्या मौनत्वं सिद्धमिति भावः, तथा गतिर्गमनं लोके प्रतीयमानापि स्थितिमयी स्थैर्यरूपा भवति 'अपाणिपादो जवनो ग्रहीते' त्यादिश्रुत्या पादराहित्येपि गमनवत्त्वप्रतिपादनात्पादराहित्येन गमनं यत्प्रतीयते तत्पारमार्थिकं न भवतीत्यतो गमनेपि स्थैर्यं संभाव्यमिति भावः, तथा तस्य जागरो जागरणमपि निद्रामयो निद्रारूपो भवति लोके निद्रावस्थायां सर्वत्रिपुटीलयप्रसिद्धेः सप्तम्यारूढस्य त्रिपुटीमिथ्यात्वप्रतीत्या जा-

१ वक्तव्यम्।

गरस्यापि निद्रात्वमिति भावः, तथा तस्य निद्रा सुषुप्तिरपि बोधमयी जागररूपा भवति सुखमहमस्वाप्सं न किञ्चिदवेदिषमित्युत्थितस्मरणान्यथानुपपत्त्याऽज्ञानबोधस्य तत्र सत्त्वात्तद्विषयाज्ञानस्य च सत्त्वात्तत्र ज्ञातृज्ञानज्ञेयरूपत्रिपुट्या विद्यमानत्वेन जाग्रल्लक्षणसत्त्वान्निद्राया जागरत्वमिति भावः, तथा तस्य निशा रात्रिर्दिनमयी दिवसरूपा भवति लोकदृष्ट्यान्धकारसत्त्वेपि निशायां सप्तम्यारूढस्य प्रकाशं विनाऽप्रकाशप्रतीत्यनुपपत्त्या तत्प्रकाशकप्रकाशतत्त्वेन रात्रेर्दिनत्वमिति भावः, तथा तस्य वासरो दिवसो नक्तंमयो रात्रिमयो भवति व्यवहारस्य मिथ्यात्वेन तत्प्रतीतेरपि पारमार्थिकत्वाभावे तत्प्रकाशस्यापि तथात्वादन्धकारस्वरूपरात्रित्वं दिनस्य सम्भाव्यमिति भावः, तथा तस्य कर्म क्रियापि ब्रह्ममयं निष्क्रियब्रह्मरूपं भवति कर्तृकरणकार्यरूपत्रिपुट्याः सप्तम्यारूढदृष्ट्या पारमार्थिकत्वाभावान्निष्क्रियब्रह्मरूपत्वं कर्मणः सिद्धमिति भावः, यद्वा 'ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतं ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिने'ति भगवदुक्त्या कर्तृहविरग्नितदर्पणफलेषु नामरूपबाधेन पर्यवशेषितब्रह्मरूपधारणाया त्रिपुट्यभावेन ब्रह्मरूपत्वप्रतिपादनात्कर्मण एव समाधित्वप्रतिपादनानुसन्धानेन सप्तम्यारूढस्य कर्मणोपि निष्क्रियब्रह्मरूपत्वमिति भावः, तथा तस्य जगल्लोकप्रसिद्धं दुःखमयं जगद्विश्वं सुखमयं सुखस्वरूपं ब्रह्मैव भवति सप्तम्यारूढदृष्ट्या जगतो मिथ्यात्वानुसन्धानेन तत्र प्रतीयमानस्यापि दुःखस्यात्यन्तासत्वाच्च जगद्गतसुखस्य च केवलब्रह्मसुखाभिन्नत्वानुसन्धानेन च जगतः सुखमयत्वं सिद्धमिति भावः, तथा तस्य किञ्चिद्दृग्विषयजातमेव न किञ्चिन्मयं न किञ्चिद्दृग्गोचर आत्मा तन्मयं तद्रूपं भवति 'सर्वं खल्विदं ब्रह्म नेह ना-

नास्ति किञ्चने'ति श्रुत्यां बाधसामानाधिकरण्यस्य ब्रह्मेदंशब्दयोः प्रतीयमानत्वाद्दृग्गोचरस्य सर्वपदवाच्यस्य जगतोऽत्यन्तासत्त्वेन दृश्यं जगदेवादृश्यं ब्रह्मेति भावः, एवं च सप्तम्यारूढवार्त्तायां वर्णनस्य विरुद्धत्वेन प्रतीयमानत्वाद्वर्णनासम्भव इति भावः ॥७॥

इदानीं सप्तम्यारूढस्य प्रतापनिरूपणेन तल्लक्षणमाह ।

अत्यन्तहीनो बलपौरुषाभ्यामकिंचनो यो गलिताभिमानः ।
तेनैव नीता रिपवो विनाशं न ये हतास्तात महेन्द्रमुख्यैः ॥८॥

अत्यन्तेति। लोके तावद्बलवान्धनी साभिमानी शत्रून्नाशयति अत्र त्विदमाश्चर्यं यः पुरुषो बलपौरुषाभ्यां बलं शरीरदार्ढ्यं पौरुषमुद्योगस्ताभ्यामत्यन्तहीनोऽत्यन्तरहितः पुनश्चाकिञ्चनो निष्किञ्चनः पुनश्च गलिताभिमानो गलितो नष्टोऽभिमानो यस्य स तथोक्तो योऽस्ति तेनैव नान्येन पुरुषेण रिपवः शत्रवो विनाशं लयं नीताः प्रापिताः, इदमाश्चर्यं सप्तम्यारूढेऽस्तीति भावः, ननु बलादिहीनेन ये नाशिताः शत्रवस्ते निर्बला एव भवेयुरित्याशङ्क्याह नेति, हे तात हे शिष्य ये शत्रवः कामादयो महेन्द्रमुख्यैर्महेन्द्रो मघवा मुख्यो आदिर्येषु ते तथोक्तास्तैर्न हता न मारिताः प्रत्युत तैः कामादिशत्रुभिरेवेन्द्रादयो जित्वा स्ववशे स्थापितास्तादृशाः प्रबला अपि शत्रवः सप्तम्यारूढेन पौरुषादिहीनेनापि नाशिता इति भावः ॥ ८ ॥

रूपकेण सप्तम्यारूढस्थितिं बुध्यारोहायाह ।

ब्रह्मविद्ब्रह्मविद्यायां भवान्यां पुत्रतां गतः ।
निजाङ्के लालयत्येनं परमात्मा सदाशिवः ॥ ९ ॥

इति श्रीनरहरिकृतौ बोधसारे भूमिकाभेदभास्करे
ज्ञानसप्तमभूमिकानिर्णयः ॥ ८ ॥

ब्रह्मविदिति। ब्रह्मविद्ब्रह्म देशतः कालतो वस्तुतश्चापरिच्छिन्नं वस्तु वेत्ति जानाति स तथाभूतः पुरुषो ब्रह्मविद्यायां ब्रह्मणो देशादिपरिच्छेदरहितस्य वस्तुनो विद्या ज्ञानमेतन्नाम्न्यामित्यर्थः, भवान्यां पार्वत्यां पुत्रतां पुत्रभावं गतः प्राप्तो यदा तदेत्यध्याहार्यं परमात्मा कार्यकारणातीत आत्मा सदाशिवः सर्वदैव सुखरूपत्वाच्छङ्कर एनं ब्रह्मविदं सप्तम्यारूढमित्यर्थः, निजाङ्के निजं स्वीयमंशत्वादङ्कं शबलं ब्रह्म तस्मिन्नभेदेन लालयति प्रीत्या खेलयति ॥ ९ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ भूमिकाभेदभास्करार्थप्रकाशे सप्तमभूमिकानिर्णयार्थप्रकाशोऽष्टमः ॥ ८ ॥

एवं सप्तविधां सलक्षणां ज्ञानभूमिं प्रतिपाद्येदानीं तासां निर्णयाय भूमिकाशास्त्रार्थनिर्णयाख्यं सप्तदशश्लोकं प्रकरणं वक्तुं प्राह ।

अथ भूमिकाशास्त्रार्थनिर्णयः ।

अथेति। अथ सप्तभूमिकानिरूपणानन्तरं भूमिकाशास्त्रार्थनिर्णयो भूमिकानां पूर्वोक्तसप्तभूमीनां शास्त्रार्थः शासकवाक्यार्थस्तस्य निर्णयो निश्चयो निरूप्यत इति शेषः, तमेवाह ।

भूमिकात्रितयं जाग्रच्चतुर्थी स्वप्न उच्यते ।
तावती साधकावस्था तारतम्येन योगिनाम् ॥ १ ॥

भूमिकेति। पूर्वं जिज्ञासा–विचारा–तनुमानसाख्यं भूमिकात्रितयं भूमिकानामवस्थानां त्रितयं जाग्रज्जागराख्यावस्थोच्यते कथ्यते तथा चतुर्थी सत्त्वापत्त्याख्या भूमिः स्वप्नः स्वप्नावस्थो-

च्यते कथ्यते तावती चतुर्थभूमिपर्यन्ता योगिनां जिज्ञासूनां तारतम्येन न्यूनाधिकत्वेन साधकावस्था साधकत्वरूपाऽवस्था स्थितिरिति ज्ञेया ॥ १ ॥

तत उत्तरावस्थासु सिद्धाऽवस्थात्वं तारतम्येन दर्शयति।

पञ्चमीं तु समारभ्य सिद्धावस्थैव सा त्रिधा।
तिसृणामप्यवस्थानां दृष्टान्तोऽत्र निरूप्यते॥ २ ॥

पञ्चमीमिति। पञ्चमीमसंसक्तिनाम्नीं भूमिकां समारभ्य सम्यगङ्गीकृत्योत्तरा सिद्धावस्थैव सिद्धस्थितिरेव ज्ञेयाऽऽत्मापरोक्ष्यात् सा सिद्धावस्था त्रिधा त्रिप्रकारा ज्ञेया तद्भेदस्वरूपं दर्शयितुं दृष्टान्तनिरूपणं प्रतिजानीते तिसृणामिति, तिसृणां त्रिसंख्यानामपि अवस्थानां भूमिकानामत्रास्मिन् प्रकरणे दृष्टान्तो युक्त्यपरपर्याय उदाहरणमित्यर्थः, निरूप्यते कथ्यते ॥ २ ॥

प्रतिज्ञातमेव दृष्टान्तमाह द्वाभ्याम्।

सुषुप्तेः प्रथमावस्था तस्यां यत्सुखमाप्यते।
सुषुप्तेर्या घनावस्था तस्यामपि तदेव हि॥ ३ ॥

सुषुप्तेरिति। सुषुप्तेर्लोकप्रसिद्धनिद्राया या प्रथमा शिथिलाऽवस्था स्थितिस्तस्यामवस्थायां यत्सुखं यत्प्रकारकं सुखमाप्यते लभ्यते तदेव तत्सुखमेव सुषुप्तेर्निद्राया या घनावस्था निबिडा स्थितिरस्ति तस्यामप्यवस्थायामाप्यते प्राप्यते हि प्रसिद्धमिदं लोक इत्यर्थः ॥ ३ ॥

सुखं घनसुषुप्तौ तत्सुखं गाढसुषुप्तके।
तुर्यायामपि सप्तम्यामानन्दानुभवः समः॥ ४ ॥

सुखमिति। यत्सुखं शर्म घनसुषुप्तौ घना निबिडा सुषुप्ति-

निद्रा तस्यामस्ति तत्सुखमेवानन्दो गाढसुषुप्तके गाढं दृढं यत्सुषुप्तकं निद्रा तस्मिन्नस्ति अतस्त्रिविधसुप्तौ शिथिलघनगाढत्वभेदेन त्रिप्रकारायामपि निद्रायामानन्दानुभव आनन्दस्य सुखस्यानुभवः प्रतीतिः सम एक एव स्याद्भवेद्यथा यद्वत् ॥ ४ ॥

दार्ष्टान्तिके यो जयति ।

तथा य एव पञ्चम्यां षष्ठ्यामपि स एव हि ।
तुर्यायामपि सप्तम्यां ब्रह्मानन्दः स एव हि ॥ ५ ॥

तथेति । तथा तद्वद्य एव विद्वत्प्रत्यक्षो ब्रह्मानन्दो भूमशब्दवाच्यं सुखं पञ्चम्यामसंसक्तिनाम्न्यां पञ्चमभूमिकायामस्ति स एव हि असावेव ब्रह्मानन्दः षष्ठ्यामपि पदार्थाभाविनीनाम्न्यामप्यवस्थायामस्ति हि प्रसिद्धं तथा यो ब्रह्मानन्दः षष्ठ्यामस्ति स एव हि असावेव प्रसिद्धो ब्रह्मानन्दस्तुर्यायां तुर्याख्यायां सप्तमभूमिकायामपि अस्ति अतस्तिसृष्वप्यवस्थासु ब्रह्मानन्दस्त्वेक एवेति भावः ॥ ५ ॥

नन्वानन्दस्यैकत्वे कुतो भूमिभेदस्तत्राह ।

अभ्यासतारतम्येन तारतम्ये चिरस्थितौ ।
अपरोक्षानुभुतेस्तु तारतम्यं मनाङ्न हि ॥ ६ ॥

अभ्यासेति । अभ्यासतारतम्येनाभ्यासो विवेकावृत्तिरूपस्तस्य तारतम्यं न्यूनाधिकभावस्तेन चिरस्थितौ चिरं बहु कालं या स्थितिरवस्थानमानन्दाकारता तस्यां तारतम्ये सतीत्यर्थः, अपरोक्षानुभूतेरपरोक्षा प्रत्यक्षा याऽनुभूतिरनुभवस्तस्या मनागीपदपि तारतम्यं न्यूनाधिक्यं न हि नैव विद्यते ॥ ६ ॥

अपरोक्षानुभूतेर्न्यूनाधिक्याभावे दृष्टान्तमाह ।

नास्वादिता सिता यावत्तावन्नास्वादितैव सा ।
एकदास्वादिता चेत्सा नैव नास्वादिता भवेत् ॥७॥

नेति । सिता श्वेतखण्डं यावद्यत्कालपर्यन्तं नास्वादिता न भक्षिता भवति तावत्तत्कालपर्यन्तं सा सिता श्वेतखण्डं नास्वादिता नैव भक्षिता भवेत्स्यात् सा सितैकदास्वादितैकस्मिन्समय एकवारमपि आस्वादिता खादिता स्याच्चेद्भवेद्यदि तर्हि नास्वादिता न भक्षिता नैव भवेन्न स्यादेकदैव भक्षितायां तस्यां बहुवारं वा भक्षितायां च स्वादस्यैकरूपत्वं यथा यद्वत् ॥ ७ ॥

दार्ष्टान्तिकमाह ।

जाता चेत्सा तु जातैव जातु नाजाततां भजेत् ।
कथं भूयो भ्रमत्येष भ्रान्तिरेव गता यदि ॥ ८ ॥

जातेति । तथा सा तु अपरोक्षानुभूतिश्च जाता चेद् उत्पन्ना यदि स्यात्तर्हि जातु कदाचिदपि अजाततामनुत्पन्नतां न भजेन्न व्रजेत्, कुतः इत्यत आह कथमिति, एष पञ्चम्यारूढो जातसाक्षात्कारो जीवो यदि यर्हि भ्रान्तिरेव केवलं भ्रमोपि गता निवृत्ता तर्हि भूयः पुनः कथं केन प्रकारेण भ्रमति विक्षिप्यते न कथमपीत्यर्थः ॥ ८ ॥

एवमपरोक्षानुभवस्यैकरूपतां तस्मिंश्च सति पुनर्भ्रान्त्यभावं च प्रदर्श्येदानीं तत्रोपाधिकृतविशेषं दर्शयितुमाह ।

अथ कश्चिद्विशेषः ।

अथेति । अथेदानीमपरोक्षानुभूतौ कश्चित्कोपि विशेषो भेदोऽस्ति स उच्यत इति शेषः, तमेव विशेषं दर्शयति सार्धाभ्याम् ।

तुरीया प्रथमाभासे विद्युदाभासलक्षणा ।
ततश्चञ्चलदीपाभा ततो निश्चलदीपवत् ॥ ९ ॥

तुरीयेति । तुरीया जाग्रदाद्यवस्थात्रयाऽपेक्षयाऽपरोक्षानुभूतिः पञ्चम्यादिभूमिकात्रयरूपा तुरीया चतुर्थी ज्ञेया सा प्रथमाभासे प्रथमः पञ्चमभूमिकायामाभासोनुभवस्तस्मिन् विद्युदाभासलक्षणा विद्युतस्तडित आभासः प्रकाशः स एव लक्षणं चिह्नं यस्यां सा तादृशी ज्ञेया ततोऽनन्तरं षष्ठभुमिकाया आरम्भे चञ्चलदीपाभा चञ्चलो वायुचालितो यो दीपस्तस्याभेवाभा कान्तिर्यस्याः सा तादृशी भवति । ततस्तदनन्तरं षष्ठ्यामेव परिणामेन निश्चलदीपवत्साऽपरोक्षानुभूतिर्निश्चलः स्थिरो यो दीपस्तद्वत्तस्य प्रभेवेत्यर्थः, सा भवति ॥ ९ ॥

सूर्यप्रभावच्च ततः सप्तमी चिरवर्त्तिनी ।
उदयास्तविहीना सा दिनपक्षर्त्तुवत्सरम् ॥ १० ॥

सूर्येति । ततोनन्तरं सप्तम्यां साऽपरोक्षानुभूतिः सूर्यप्रभावत्सूर्यस्यादित्यस्य प्रभा प्रकाशस्तद्वत्तत्तुल्या भवति च पुनः सप्तमी तुर्याख्याऽपरोक्षानुभूतिश्चिरवर्तिनी चिरं वर्तितुं शीलमस्याः सा तथोक्ता भवति बहुकालस्थिरेत्यर्थः, सा च सप्तम्यऽपरोक्षानुभूतिः परिणता सती दिनपक्षर्तुवत्सरं दिनं दिवसः, पक्षश्च शुक्लकृष्णभेदेन पञ्चदशदिनसमूहात्मकः, ऋतुश्च मासद्वयात्मको वसन्तादिर्वत्सरश्च द्वादशमासात्मकः प्रभवादिः काल एतेषां समहारद्वन्द्वैकवद्भावोऽत्यन्तसंयोगे द्वितीया तेष्वित्यर्थः॥१०॥

पुष्कला निश्चला पूर्णा परमानन्दसुन्दरी ॥ ११ ॥

निश्चला स्थिरेत्यर्थः, अत एव पुष्कला परिपुष्टा पूर्णा सर्वत्र

परिपूर्णा तथा परमानन्दसुन्दरी परमानन्दो निरतिशयसुखं तेन सुन्दरी सर्वेषां कमनीया ॥ ११ ॥

एवमपरोक्षानुभवे तारतम्यं प्रदर्श्येदानीमपरोक्षानुभववतां सामर्थ्यं निरूपयति ।

येषां ध्यानकलायां च लीयन्ते गुणपङ्क्तयः ।
येषां कृपाकटाक्षेण सद्यो मुक्तिरवाप्यते ॥ १२ ॥

येषामिति । येषामपरोक्षानुभविनां जिज्ञासुभिरन्यैः कृतं यद्ध्यानं तस्य कलांशस्तस्यां गुणपङ्क्तयो गुणानां सत्त्वरजस्तमसां तत्कार्याणां कामादीनां च पङ्क्तयः समूहा लीयन्ते लीना भवन्ति तथा येषामपरोक्षानुभववतां कृपाकटाक्षेण कृपया दयया-यः कटाक्ष नेत्रैकदेशेनावलोकनं तेन जिज्ञासूनां सद्यस्तत्कालमेव मुक्तिर्मोक्षोऽवाप्यते प्राप्यते, इदमप्युत्तरभूमित्रयारूढलक्षणं ज्ञेयम् ॥ १२ ॥

पञ्चम्यादिभूमित्रयारूढस्य पुनर्जन्माभावमाह ।

पञ्चमीमथवा षष्ठीं सप्तमीं वा समाश्रिताः ।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ १३ ॥

पञ्चमीमिति । ये पुरुषाः पञ्चमीमसंसक्तिनाम्नीं भूमिकामथवा यद्वा षष्ठीं पदार्थाभाविनीनाम्नीं सप्तमीं वा तुर्याख्यां सप्तमभूमिकां वा समाश्रिताऽऽश्रित्य स्थिताः सन्ति तेषां पुरुषाणां कल्पकोटिशतैरपि कल्पानां ब्रह्मदिनानां ब्रह्मायुष्यरूपाणां महाकल्पानां वा शतानि अनन्तानि तैर्व्यतीतैरपि पुनरावृत्तिः पुनः पश्चान्मुक्तेरनन्तरमावृत्ति र्जन्ममरणरूपा संसृतिर्न न भवति ॥ १३ ॥

एवमुत्तरावस्थात्रये स्थितानां सिद्धावस्थात्वं मुक्तत्वं च प्रतिपाद्येदानीं पूर्वावस्थाचतुष्कस्थितानामपि मरणादिना केनचित्प्रतिबन्धेन तत्त्वज्ञानानुत्पत्तौ मुक्त्यभावेपि जन्मान्तरे पूर्ववदभ्यासेन मुक्तिप्राप्तिमाह सार्धेन।

पूर्वावस्थाचतुष्के ये स्थिता देहं विहाय ते।
पुनर्देहान्तरं प्राप्य ब्रह्माभ्यासं प्रकुर्वते ॥ १४ ॥

पूर्वेति। ये मुमुक्षवः पूर्वावस्थाचतुष्के पूर्वाः प्रथमा या अवस्था भूमयो जिज्ञासा विचारा तनुमानसा सत्त्वापत्त्याख्यास्तासां चतुष्कं चतुष्टयं तस्मिन् केन चित्प्रतिबन्धेन तत्त्वसाक्षात्कारालाभेन स्थिता वर्त्तमाना भवन्ति ते पुरुषा देहं शरीरं विहाय त्यक्त्वा पुनर्भूयो जन्मान्तरमन्यज्जन्म प्राप्य लब्ध्वा ब्रह्माभ्यासं।

तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम्।
एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ॥

इत्युक्तलक्षणं ब्रह्मप्राप्तिसाधनभूतं यत्नं प्रकुर्वते प्रकर्षेणानुशीलयन्ति ॥ १४ ॥

ननु पूर्वभूमिकाचतुष्कस्थितानामन्यजन्मनि मोक्षो भवतीति स्वकपोलकल्पितमित्याशङ्क्याह।

योगभ्रष्टास्त उच्यन्ते क्रमेण ब्रह्मगामिनः।
योगिनो योगसिद्धाश्च दत्ताद्या जनकादयः ॥ १५ ॥

योगभ्रष्टा इति। ते पूर्वभूमिकाचतुष्कस्थिता योगभ्रष्टा योगभ्रष्टनामका उच्यन्ते कथ्यन्ते गीतादाविति शेषः, तथा च गीता।

'प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोभिजायते ॥
अथवा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥
त्रत तं बुद्धिसंयोगं लभते पौर्वदैहिकामि'ति ।

ते च श्रुतिषु क्रमेणोत्तरोत्तरलोकप्राप्तिक्रमेण ब्रह्मगामिनो ब्रह्मप्राप्ता भविष्यन्तीत्युक्तास्तथा च श्रुतिः, ।

'वेदान्तविज्ञानसुनिश्चितार्थाः सन्यासयोगाद्यतयः शुद्धसत्त्वाः।
ते ब्रह्मलोकेषु परान्तकाले परामृता परिमुच्यन्ति सर्वे' इति ॥

एवं पूर्वभूमिकाचतुष्टयस्थितानां जन्मान्तरे मुक्तिं सम्भाव्येदानीं सिद्धानपि कांश्चिदुत्तरभूमित्रयारूढानुदाहृत्य दर्शयति योगिन इति, ब्रह्मादयस्तु स्वत एव योगिनो योगशब्दवाच्यजीवब्रह्मैक्यज्ञानवन्तः स्वत एवेत्यर्थस्तथा दत्ताद्या दत्तनामाऽत्रिपुत्र आद्यो मुख्यो येषां ते तथोक्तास्तथा जनकादयो जनको मैथिलः स आदिर्मुख्यो येषां ते तथोक्तास्ते सर्वे योगसिद्धा योगेन हठादिना वा तत्फलभूतजीवब्रह्मैक्यज्ञानेन वा सिद्धा मुक्ता जाता इत्यर्थः ॥ १५ ॥

तथा ।

ईश्वरानुग्रहं प्राप्ता अर्वाचीनाश्च के चन ।
स्वरूपानुभवं प्राप्ता मुक्तास्ते सर्व एव हि ॥१६॥

ईश्वरेति । केचन कति चित्पुरुषा अर्वाचीनाश्चेदानीन्तना अपि ईश्वरानुग्रहमीश्वरस्येशनादिशक्तियुक्तस्यानुग्रहमनुग्रहः कृपा तदुपलक्षितं सद्गुरुप्राप्तिसच्छास्त्रसेवनरूपं प्राप्ता लब्धास्तत्प्राप्त्या मोक्षं प्राप्ता इति भावः, तदुक्तं ।

'यावन्नानुग्रहः साक्षाज्जायते परमेश्वरात् ।
तावन्न सद्गुरुं कश्चित्सच्छास्त्रमपि नो लभेदि'ति ॥

सर्व एव त उक्ताः समस्ता अपि पञ्चम्यादिभूमित्रयारूढा इत्यर्थः, मुक्ता मोक्षं प्राप्ता भवन्ति हि विद्वत्स्वेतत्प्रसिद्धमित्यर्थः, तत्र हेतुमाह स्वरूपेति, स्वरूपानुभवं स्वस्यात्मनो रूपं सच्चिदानन्दघनत्वं तस्यानुभवः साक्षात्कारस्तं प्राप्ता लब्धा अतो मुक्ता इत्यर्थः ॥ १६ ॥

एवं सिद्धान्प्रदर्श्येदानीं तेषां भूमिकाभेदसत्त्वेऽपि मुक्तेरेकरूपत्वं दर्शयति ।

सुषुप्तौ केचिदाश्वस्ताः केचिद्धनसुषुप्तके ।
केचिद्गाढसुषुप्तौ च सर्वेषाममृतं समम् ॥ १७ ॥

इति श्रीनरहरिकृतौ बोधसारे भूमिकाभेदभास्करे
भूमिकाशास्त्रार्थनिर्णयः ॥ ९ ॥

सुषुप्ताविति । केचित्सनत्कुमारनारदप्रभृतयो व्यवहारीव कदाचित्प्रवृत्तत्वात्सुषुप्तौ शिथिलसुषुप्त्याख्यायां पञ्चम्यामित्यर्थः, आश्वस्ता विश्वस्ताः, इयमेव परा काष्ठेति निश्चित्य तत्रैव स्थिता इति भावः, केचिद्धनसुषुप्तके केचिद्व्यासवदहस्पातिप्रमुखाः परेच्छया वासनोद्बोधेन व्यवहारे प्रवर्तमाना दृश्यन्तेऽतस्ते घनसुषुप्तके निबिडसुषुप्तौ षष्ठ्यामित्यर्थः, आश्वस्ताः कृतार्थत्वं निश्चित्य स्थिता इत्यर्थः, तथा केचिद्ब्रह्मविष्णुप्रभृतयः परमार्थतो व्यवहाराप्रवृत्तेर्गाढसुषुप्तौ गाढा दृढा सुषुप्तिर्निद्रा परकृतबोधेनापि व्युत्थानानर्हा सप्तमी भूमिस्तस्यामाश्वस्ता विश्रस्य स्थिताः, अयं भावः, पञ्चम्यारूढानां कदाचित्स्वत एव प्रपञ्चसत्त्वदृष्ट्या व्यवहारप्रवृत्तिः, षष्ठ्यारूढानां परकृतबोधनेन प्रपञ्चसत्त्वबुद्ध्या कदाचिद्व्यवहारप्रवृत्तिः, सप्तम्यारूढानां तु स्वतः

परतोपि प्रपञ्चसत्त्वबुद्ध्या व्यवहाराप्रवृत्तिरिति भेदः, मिथ्यात्व-बुद्ध्या तु सर्वेषां व्यवहारप्रवृत्तिस्तुल्यैवेति, तथा सत्यपि अमृतं मोक्षसुखं सर्वेषां भूमित्रयस्थितानां सममेकरूपमस्ति अतः पञ्चम्यादिभूमित्रयं सिद्धावस्थैवेति भावः ॥ १७ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ भूमिकाभेदभास्करार्थप्रकाशे सप्तमभूमिकानिर्णयार्थ-प्रकाशो नवमः ॥ ९ ॥

समाप्तं चेदं प्रकरणम् ।

एवं ज्ञानाज्ञानभूमीश्चतुर्दश सलक्षणाः प्रदर्श्येदानीं प्रद-र्शितमेव पूर्वप्रकरणार्थं विशदीकर्तुं प्रकारान्तरेणावस्था व्य-वस्थापयितुं चावस्थाव्यवस्थाभिधं षट्त्रिंशच्छ्लोकं प्रकरणं प्रवक्तुमाह ।

अथावस्थाव्यवस्था ।

अथेति । अथ भूमिकाभेदभास्करनिरूपणानन्तरमवस्था-व्यवस्थाऽवस्थानां वक्ष्यमाणानां जाग्रदादीनां व्यवस्था व्य-वस्थितिर्मर्यादेत्यर्थः, तन्निरूपकत्वादवस्थाव्यवस्थाख्यं प्रकरण-मिति भावः, निरूप्यत इति शेषः । प्रतिज्ञातमेव प्रकरणं निरूप-यितुं तच्छ्रवणे शिष्यं प्रेरयति ।

अथावस्थाव्यवस्थाख्यं किञ्चित्प्रकरणं शृणु ।
यस्मिन्परीक्षिते सम्यक्परीक्ष्यं नावशिष्यते ॥१॥

अथेति । हे शिष्य त्वमथातः परं किञ्चित्स्वल्पं सं-क्षिप्तमित्यर्थः, अवस्थाव्यवस्थाख्यमवस्थानां वक्ष्यमाणलक्ष-णानां व्यवस्था मर्यादास्ति यस्यामिति अर्शआद्यच् अत एतदाख्यमेतन्नामकं प्रकरणं मया वक्ष्यमाणं शृणु अव-

धारय, नन्वेतच्छ्रवणे किं फलं तत्राह यस्मिन्प्रकरणे सम्यग्य-थार्थं परीक्षितेऽवलोकिते सति पुनः पुनर्दृढं विचार्य धृते सती-त्यर्थः, परीक्ष्यमवलोकनीयमन्यन्नावशिष्यतेऽवशिष्टं न वि-द्यते सर्वत्र परीक्ष्यवस्तुन एतत्प्रकरणप्रतिपाद्यवस्तुमात्रत्वा-दिति भावः ॥ १ ॥

प्रतिज्ञातप्रकरणनिरूपणायैव तत्प्रतिपाद्या अवस्था नाम-सङ्ख्याभ्यां निर्दिशति ।

जाग्रत्स्वप्नः सुषुप्तिश्च तथा मूढसमाधिता ।
मूर्च्छा मृत्युस्तुरीयञ्चेत्यवस्थाः सप्त कीर्तिताः ॥२॥

जाग्रदिति । जाग्रज्जागरनाम्न्येकावस्था स्वप्नः स्वप्न-नाम्नी द्वितीया तथा सुषुप्तिः सुप्तिनाम्नी तृतीया तथा त-द्वन्मूढसमाधिता मूढसमाधिनाम्नी चतुर्थी तथा मूर्च्छा मूर्च्छा-नाम्नी पञ्चमी तथा मृत्युर्मरणमेतन्नाम्नी च षष्ठी तथा तुरीयं च तुर्यनाम्नी सप्तमी–इति एवं प्रकारेणावस्थाऽन्तःकरण-स्थितयः सप्त सप्तसङ्ख्याः कीर्तिता कथिता विद्वद्भिरि-ति शेषः ॥ २ ॥

ता एव विशदयति ।

जाग्रत्स्वप्नः सुषुप्तिश्च व्यक्ता मूढसमाधिता ।
मूर्च्छा मृत्युस्तुरीयं च व्यक्ता नित्यानुभूतितः ॥३॥

जाग्रदिति । जाग्रदिन्द्रियैरर्थोपलब्धिर्जागरितमित्युक्तल-क्षणावस्था, स्वप्नो लीनेष्विन्द्रियेषु जागरसंस्कारजो विषया-भासः स स्वप्न इत्युक्तलक्षणा स्वप्नावस्था, सुषुप्तिश्च निद्रा वि-षयाभानरूपा, एतास्तिस्रोऽवस्थाः सर्वत्रोक्तत्वात्सर्वानुभवसिद्ध-त्वाच्च व्यक्ताः सर्वेषामाबालगोपं प्रकटा एव भवन्त्यतस्तत्रि-

रूपणं न क्रियत इत्यर्थः, मूढसमाधिता मूढसमाधिनाऽन्यवस्था मूर्छा मुग्धेऽर्धसम्पत्तिरिति सूत्रोपदर्शिता मूर्छावस्था मृत्युर्मरणावस्था तुरीयं च तुर्याख्यावस्था चैताश्चतस्रोऽवस्था नित्यानुभूतितो नित्यानुभवरूपेणात्मचैतन्येनैव व्यक्ताः प्रकाशिता भवन्तीति ज्ञेयाः ॥ ३ ॥

मूढसमाध्यवस्था तु पूर्वमेवोक्ताऽतो नोच्यत इत्याह ।

उक्तं मूढसमाधानं भवप्रत्ययसंज्ञकम् ।
पुराऽसंप्रज्ञातनामसमाधेर्भेदवर्णने ॥ ४ ॥

उक्तमिति । पुरा योगदीक्षाचिन्तामण्याख्यप्रकरणेऽसंप्रज्ञातसमाधेरसंप्रज्ञातनामसमाधेर्भेदवर्णने भेदनिरूपणप्रसङ्गे भवप्रत्ययसंज्ञकं भवस्य संसारस्य प्रत्ययोनुभवो बीजरूपेणास्मिन्नस्तीति भवप्रत्यय इत्येवं संज्ञा नाम यस्य तत्तथोक्तं मूढसमाधानं मूढसमाधिरुक्तं कथितमतः पुनर्नोच्यत इति भावः ॥ ४ ॥

तदेव बीजरूपेणावस्थानं प्रपञ्चस्य तत्स्थव्यवहारोदाहरणेन विशदयत्यर्धेन ।

तत्समाधिस्थिता जित्वेन्द्रादीन्स्वर्गेशतां ययुः ।
मृत्युर्मूर्च्छा प्रसिद्धेति तुरीयमभिधीयते ॥ ५ ॥

तदिति । तत्समाधिस्थिताः स एव भवप्रत्ययनामा समाधिस्तत्समाधिस्तस्मिन्स्थिताः स्थिरीभूता ये हिरण्यकशिप्वादयस्ते समाधिव्युत्थानादनन्तरमिन्द्रो मरुत्वानादिः प्रथमो येषामग्नियमादीनां ते तथोक्तास्ताञ्जित्वा युद्धे पराभूय स्वर्गेशतां स्वर्गस्येशतामीश्वरत्वं ययुः प्रापुरतो मूढसमाधौ बीजरूपेण संसारप्रत्ययो विद्यत इति भावः, ननु तर्हि मृत्युमूर्छे एव निरूप्येतामित्याशङ्क्य ते अपि प्रसिद्धत्वान्मुमुक्षूणामनादरणीयत्वाच्च न निरूप्येते इत्याशयेनाह मृत्युरिति, मृत्युर्मरणं मूर्च्छाऽर्धमृतिनाम्ना

प्रसिद्धाऽनुभूतैवेति अतो हेतोस्ते अपि परित्यज्य प्रथमं मुमुक्षूणामादरणीयत्वात्तुरीयं तुर्याख्यैवावस्थाऽभिधीयते निरूप्यत इत्यर्थः ॥ ५ ॥

प्रतिज्ञातामेव तुर्यावस्थां निरूपयति ।

वेदान्तसंप्रदायेन निदिध्यासनदार्ढ्यतः ।
परमात्मनि चित्तस्य लयस्तु तुर्यमुच्यते ॥ ६ ॥

वेदान्तेति । वेदान्तसंप्रदायेन वेदान्तस्योपनिषदादिग्रन्थस्य संप्रदायः परिपाटी तेन तदनुकूलतयेत्यर्थः, निदिध्यासनदार्ढ्यतो निदिध्यासनस्याखण्डैकब्रह्मविषयप्रत्ययावृत्तिरूपस्य दार्ढ्यतो दृढत्वेन परमात्मनि कार्यकारणातीत आत्मनि चित्तस्यान्तःकरणस्य लयस्तद्रूपेणावस्थानं यत्तत्तु तदेव तुर्यं तुरीयनामकमुच्यते कथ्यते विद्वद्भिरिति शेषः ॥ ६ ॥

तस्मिंश्च सति किं फलं तदाह ।

तत्र साक्षात्कृतं ब्रह्म मूलाविद्याविनाशकृत् ।
तत्र प्रश्नः ।
स्वप्नजागरयोस्तुल्यः संसाराडम्बरो मुने ॥ ७ ॥

तत्रेति । तत्र तुर्यावस्थायां ब्रह्म देशकालवस्तुकृतपरिच्छेदशून्यं वस्तु स्वस्मिन्नेव साक्षात्कृतं स्वाभिन्नमनुभूतं सन्मूलाविद्याविनाशकृन्मूलाविद्या स्वस्य ब्रह्मणश्चैक्याज्ञानं मूलाविद्या तस्या विनाशः क्षयस्तस्य कृत्कर्तृ भवतीति फलं तुर्यप्राप्तौ ज्ञेयम्, एवं सङ्क्षेपतोवस्थाः समापि प्रदर्श्येदानीं ता एव विस्तरतो वक्तुं प्रश्नावतरणं प्रतिजानीते तत्रेति, तत्रावस्थासु मध्ये प्रश्नोऽनुयोगः क्रियत इति शेषः; तमेवाह स्वप्नेति, हे मुने मननशील हे गुरो संसाराडम्बरः संसाररूपो घटाटोपः स्वप्नजागरयोः स्वप्ने

स्वप्नावस्थायां च जागरे च जाग्रदवस्थायां तुल्यः सम एव सुखदुःखप्रतीतिः समैवोभयत्रेति भावः ॥ ७ ॥

तर्हि केन विशेषेण संज्ञा भेदस्तयोर्वद ।

अत्रोत्तरम् ।

जानीहि प्रथमं तात भेदं विस्मृतिबोधयोः ॥ ८ ॥

तर्हीति । तर्हि तदा केन विशेषेण केन वैलक्षण्येन तयोः स्वप्नजागरयोः संज्ञाभेदः संज्ञयोरभिधानयोर्भेदः पृथक्त्वं तत्कारणं वद ब्रूहीति प्रश्नार्थः ।अस्योत्तरं वक्तुमाह ।

अत्रेति । अत्रोक्तप्रश्न उत्तरं प्रतिवाक्यमुच्यत इति शेषः, तदेवाह जानीहीति, हे तात हे शिष्य त्वं प्रथमं पूर्वं विस्मृतिबोधयोर्विस्मृतिश्च विस्मरणं बोधश्च ज्ञानं तयोर्भेदं पृथक्त्वं जानीहि विद्धि पश्चादनन्तरं स्वप्नजागरयोः स्वप्नश्च जाग्रद्विषयवासनावासितबुद्धौ विषयानुभवाभासलक्षणो जागरश्च जागृतिरिन्द्रियैरर्थोपलब्धिर्जागरितमित्युक्तलक्षणा तयोर्भेदं पृथक्त्वं ज्ञास्यसि वेत्स्यसि अतः पूर्वं तं विस्मृतिबोधभेदं शृणु अवधारय ॥ ८ ॥

एवं शिष्यं निरूप्यमाणभेदश्रवणे संमुखीकृत्येदानीं प्रतिज्ञातमेव भेदं दर्शयति ।

स्वप्नजागरयोर्भेदं पश्चाज्ज्ञास्यसि तं शृणु ।
विस्मृतिर्यन्न भासेत बोधो मिथ्यात्वनिश्चयः ॥९॥
जागरानन्तरं निद्रा तत्र स्वप्नो यदा भवेत् ।
स्वप्ने स्याज्जागराभानं न तु जागरबोधनम् ॥१०॥

विस्मृतिरिति । यत्पदार्थजातं किमपि न भासेत न प्रती-

येत सा विस्मृतिर्विस्मरणं ज्ञेया तथा मिथ्यात्वनिश्चयः पदार्थानां मिथ्यात्वस्यासत्त्वस्य निश्चयोऽध्यवसायः स बोधो ज्ञानमित्युच्यत इदमेव विस्मृतिबोधयोर्वैलक्षण्यं ज्ञेयमिति भावः, एवं विस्मृतिबोधवैलक्षण्यं प्रदर्श्यैदानीं प्रस्तुतजाग्रत्स्वप्नयोर्भेदं दर्शयति जागरेति, जागरानन्तरं जागरो जागृतिस्तस्या अनन्तरं पश्चान्निद्रा सुषुप्तिर्भवतीति स्पष्टमेवाबालगोपं तत्र तस्यां सुषुप्तौ यदा यस्मिन्काले स्वप्नः प्रातिभासिकविषयस्फुरणरूपो भवेत्स्यात्तदा तस्मिन्काले स्वप्ने स्वप्नावस्थायां जागराभानं जाग्रद्दशाया अभानं विस्मृतिर्भवेत्स्याज्जागरबोधनं जागरस्य जाग्रदवस्थाया बोधनं भानं जागरमिथ्यात्वनिश्चय इत्यर्थः, न तु भवेन्नैव स्यात् ॥ ९ ॥ १० ॥

एतदेव स्पष्टमाह ।

जागरोऽयं तु मिथ्येति बुद्धिः स्वप्ने न वर्तते ।
किन्तु जागराविस्मृत्या स्वप्ने स्वप्नार्थदर्शनम् ॥ ११ ॥

जागर इति । अयं प्रत्यक्षतया दृश्यमानो जागरो जागृतिप्रपञ्चो मिथ्या भ्रान्तिरूप इत्येवं प्रकारा बुद्धिर्निश्चयरूपान्तःकरणवृत्तिः स्वप्ने स्वप्नावस्थायां न तु नैव वर्त्तते नैव विद्यत इत्यर्थः, किन्तु किं तर्हि स्वप्ने स्वप्नावस्थायां जागराविस्मृत्याजागरस्य जागरणस्य विस्मृतिरभानं तया स्वप्नार्थदर्शनं स्वप्ने स्वप्नावस्थायां ये प्रातिभासिका अर्थास्तेषां दर्शनं प्रतीतिरस्ति विद्यते जाग्रन्मिथ्यात्वनिश्चयाभावो जागराभानं च स्वप्ने जागृतितो वैलक्ष्यण्यं ज्ञेयमिति भावः ॥ ११ ॥

उक्तं जाग्रतः स्वप्नस्य वैलक्षण्यं निगमयति ।

स्वप्नस्यैतन्निजं रूपं जागरस्याधुना शृणु ।
स्वप्नस्यानन्तरं तात जागरो हि यदा भवेत् ॥ १२ ॥

स्वप्नस्येति । एतदिदमुक्तलक्षणं स्वप्नस्य स्वप्नावस्थया निजं स्वीयं रूपं ज्ञेयम, एवं जाग्रद्दशातः स्वप्नस्य वैलक्षण्यं प्रदर्श्येदानीं जागरस्यापि स्वप्नतो वैलक्षण्यं श्रोतुं शिष्यमभिमुखीकरोति जागरस्येति, हे शिष्य अधुनेदानीं जागरस्य जागरणस्य स्वरूपं शृणु श्रोतव्यं, प्रतिज्ञातमेव जाग्रस्वरूपनिरूपणं करोति स्वप्नस्येति, हे तात हे शिष्य स्वप्नस्य स्वप्नावस्थाया अनन्तरं पश्चाद्यदा यस्मिन्काले हि प्रसिद्धो जागरो जागरणं भवेत्स्यात् ॥१२॥

स्वप्नमिथ्यात्वबुध्यात्मस्वप्नबोधस्तदा भवेत् ।

अन्यच्च ।

स्वप्ने तु यादृशी तात भवेज्जागरविस्मृतिः ॥१३॥

स्वप्नेति । तदा तस्मिन्समये स्वप्नमिथ्यात्वबुद्ध्या स्वप्नस्य सविषयस्वप्नावस्थाया मिथ्यात्वमसत्त्वं तस्य बुद्धिर्निश्चयात्मिकान्तःकरणवृत्तिस्तयाऽऽत्मस्वप्नबोध आत्मनः स्वप्नद्रष्टुः स्वस्यैव स्वप्नावस्थाया बोधो ज्ञानं भवेत्स्याज्जागरे स्वप्नाविस्मरणं स्वप्नबोधश्चेति स्वप्नतो जागरस्य वैलक्षण्यं सिद्धमिति भावः, अन्यदपि वैलक्षण्यं वक्तुमाहान्यच्चेति, अन्यच्च लक्षणान्तरमपि उच्यत इति शेषः, तदेवाह स्वप्ने त्विति, हे तात हे शिष्य स्वप्ने स्वप्नावस्थायां जागरविस्मृतिस्तु जागरविस्मृतिर्जागराभानमपि यादृशी यद्वद्भवेत्स्यात् ॥ १३ ॥

जागरे तादृशी नास्ति स्वप्नसंसारविस्मृतिः ।
जागरे स्मर्यते स्वप्नस्तस्य मिथ्यात्वदर्शनम् ॥ १४ ॥

जागर इति । जागरे जाग्रदवस्थायां स्वप्नसंसारविस्मृतिः स्वप्ने स्वप्नावस्थायां यः प्रतीयमानः संसारः सुखदुःखजन्ममरणादिरूपस्तस्य विस्मृतिरभानं तादृशी तद्वन्नास्ति न विद्यत

इदं च वैलक्षण्यं स्पष्टमेवेति भावः, अन्यदपि वैलक्षण्यान्तरमाह जागर इति, जागरे जागरावस्थायां स्वप्नः सविषया स्वप्नावस्था स्मर्यतेऽनुसन्धीयते तस्य स्वप्नस्य मिथ्यात्वदर्शनं मिथ्यात्वस्यासत्त्वस्य दर्शनं भानमस्तीति शेषः ॥ १४ ॥

स्वप्ने न स्मर्यते जाग्रन्न तन्मिथ्यात्वदर्शनम् ।
अनेनातिविशेषेण स्वप्नजागरयोर्भिदा ॥ १५ ॥

स्वप्न इति। यथा तथेत्यध्याहार्यं स्वप्ने स्वप्नावस्थायां जाग्रत्सविषया जाग्रदवस्था न स्मर्यते नानुसन्धीयते तन्मिथ्यात्वदर्शनं तस्या जाग्रदवस्थाया मिथ्यात्वमसत्त्वं तस्य दर्शनमपीत्यध्याहार्यं, न नैव विद्यते, उक्तं स्वप्नजाग्रद्भेदनिरूपणमुपसंहरति अनेनेति, अनेनोक्तेनातिविशेषेण त्रिप्रकारेणाप्यतिवैलक्षण्येन स्वप्नजागरयोः स्वप्नश्चोक्तलक्षणा स्वप्नावस्था जागरश्च जागृतिस्तयोर्भिदा भेदः सिद्ध इति भावः ॥ १५ ॥

एवं सप्तावस्थासु मध्ये पूर्वमवस्थाद्वयं भेदेन प्रदर्श्येदानीमुत्तराः पञ्चाप्यवस्था भेदेन प्रदर्शयितुं प्रश्नोत्थापनमवतारयति।

अथप्रश्नान्तरम् ।

अथेति। अथ पूर्वावस्थाद्वयभेदज्ञानानन्तरं प्रश्नान्तरमन्यो द्वितीयः प्रश्नोनुयोगः प्रश्नान्तरं पूर्वप्रश्नापेक्षया द्वितीयः प्रश्न इत्यर्थः, क्रियत इति शेषः। तमेवाह।

ननु मूढसमाधौ च मूर्च्छामृत्युसुषुप्तिषु ।
तुरीये च न दृश्यश्रीस्तर्हि तेषां भिदा कुतः ॥ १६ ॥

नन्विति। नन्विति शङ्कायामियं ममाशङ्का जाता मूढसमाधौ पूर्वोक्तलक्षणे मूढसमाधाने भवप्रत्ययनामके पुनश्च मूर्छामृत्युसुषुप्तिषु मूर्छा चार्धमृतिरूपा मुग्धेर्धसम्पत्तिरितिसूत्रोपदर्शिता मृत्युश्च प्राणादिवियोगेन देहपत-

नरूपः प्रसिद्धः सर्वेषु, सुषुप्तिश्चान्तःकरणेन्द्रियादीनां कारणाज्ञानमात्ररूपेणावस्थानं निद्रापरपर्याया तासु तुरीये च तुर्यावस्थायामपि दृश्यश्रीर्दृश्यस्य त्रिपुटीरूपप्रपञ्चस्य श्रीः शोभा न न विद्यते दृश्याभानं पञ्चावस्थास्वपि तुल्यमिति, तदा तर्हि तेषां मूर्च्छादितुर्यान्ताऽवस्थालक्षणानां भिदा भेदः कुतः कुतः कारणादस्ति वैलक्षण्याभावान्न कुतोपि भेदः सम्भवतीति भावः ॥ १६ ॥

एवं प्रश्नं निरूप्योत्तरं वक्तुं प्रतिजानीते ।

अत्रोत्तरम् ।

अत्रेति । अत्र द्वितीये प्रश्न इत्यर्थः, उत्तरं प्रतिवाक्यमुच्यत इति शेषः । तदेवाह ।

सिद्धिकामनया यैस्तु तप उग्रं कृतं महत् ।
देहोपि विस्मृतस्तैस्तु क्रिमिकीटादिभक्षितः ॥ १७ ॥

सिद्धीति । यैस्तु संसाररसिकैर्हिरण्यकशिप्वादिभिः सिद्धिकामनया सिद्धीनामिन्द्रादिपदप्राप्तिरूपाणां कामनेच्छा तया महद्बहूग्रं त्रैलोक्यसन्तापकं तपः शीतोष्णादिक्लेशसहनेन ब्रह्माराधनरूपं कृतमाचीर्णं तैस्तूक्तैर्हिरण्यकशिप्वादिभिर्देहोपि कायोपि विस्मृतो न ज्ञातः, ननु तैर्देहो विस्मृत इति कुतो निश्चितं तत्राह क्रिमिकीटेति, क्रिमिकीटादिभक्षितः क्रिमयश्च पिपीलिकाः कीटास्तद्विशेषा एव त आदयो येषां ते तथोक्तास्तैर्भक्षितो जग्धः स न ज्ञातोऽत एव तेषां भानं देहे नास्तीति निश्चीयत इति भावः ॥ १७ ॥

नेयं मूर्च्छा न रोगोयं न मृत्युर्जीवनादयम् ।
सुषुप्तानन्दविरहान्न सुषुप्तिरिति स्फुटम् ॥ १८ ॥

नेति । इयं विस्मृतिस्तपःपूर्विकाऽतो मूर्छाऽर्धमृत्याऽख्यावस्था न न भवति कुतो न मूर्छात्वमस्यास्तत्राह नेति, अयं तपःक्लेशो रोगो व्याधिर्न न विद्यते, नन्वस्या मूर्च्छात्वं मास्तु मृत्युत्वं कुतो न स्यादित्याशङ्क्याह नेति, इयं विस्मृतिर्मृत्युर्मरणं न न भवति, कुतो नास्या मृत्युत्वं तत्राह जीवनात्प्राणधारणादित्यर्थः, प्राणवियोगस्यैव मृत्युत्वप्रसिद्धेरिति भावः, नन्वस्य समाधेर्मूर्च्छात्वं मृत्युत्वं च मा भूतां सुषुप्तत्वमस्तु तत्राह सुषुप्तेति, सुषुप्तानन्दविरहात्सुषुप्तं निद्रा तस्मिन्य आनन्दः सुखमस्ति उत्थितस्य पुरुषस्य सुखमहमस्वाप्समिति स्मृत्यन्यथानुपपत्त्यानुमेयं यत्सुखं तेन विरहाद्वियोगान्न सुषुप्तिर्न निद्रा सुप्तौ हि सर्वैः सुखमनुभूयतेऽतस्तद्रहितत्वान्नास्य सुषुप्तित्वमिति भावः, इति एतत्स्फुटं प्रकटमस्ति अत्र न कस्यापि सन्देह इति भावः ॥ १८ ॥

नन्वस्या विस्मृतेर्मास्तु सुषुप्तित्वं तुर्यत्वमस्त्वित्याशङ्क्याह ।

स्वरूपलाभविरहान्मूढत्वान्न तुरीयकम् ।
दृश्यभानं तु नास्त्यासु तावता न कृतार्थता ॥ १९ ॥

स्वरूपेति । इयं विस्मृतिस्तुरीयकं तुरीयावस्थापि न न भवति, नन्वस्याः कुतो न तुर्यात्वं तत्राह स्वरूपेति, स्वरूपस्य स्वप्रकाशचिन्मात्रस्वभावस्यात्मनो लाभः साक्षादनुभवस्तेन विरहो वियोगस्तस्माद्धेतोः स्वप्रकाशात्मलाभ एव तुर्यशब्दवाच्यः सर्वशास्त्रेषु प्रसिद्धोऽतः परिशेषान्मूढत्वाच्च मूढभावादस्या विस्मृतेर्मूढसमाधित्वं सिद्धमिति ज्ञेयम् । अयं भावः, मौढ्यशेषेण तपःक्लेशेन च देहादिविस्मृतिर्मूढसमाधिरित्युच्यते, रोगादिपीडापूर्विका देहादिविस्मृतिर्मूर्छा, प्राणादिवियोगपूर्विका देहादिविस्मृतिर्मृत्युरित्युच्यते, सुखानुभवपूर्विका मौढ्यविशिष्टा

देहादिविस्मृतिः सुषुप्तिरुच्यते स्वयं प्रकाशात्मलाभपूर्विका मौढ्यहीना तुर्येति विवेकः, ननु मूढसमाध्यादितुर्यान्तावस्थापञ्चके दृश्यभानाभावमात्रेणैव मौढ्यशेषेपि मुक्तिसिद्धिः कुतो नेत्याशङ्क्य तदर्धाङ्गीकारेण शेषं समाधत्ते दृश्यभानमिति, आसु तूक्तपञ्चावस्थास्वपि दृश्यभानं दृश्यस्य जगतो भानमनुभवो नास्ति न विद्यते सत्यमेतत्परन्तु तावता दृश्यभानाभावमात्रेणैव केवलं न कृतार्थता कृतकृत्यत्वलक्षणा नित्यतृप्तिर्न न भवेत् ॥ १९ ॥

कुत इत्यत आह ।

व्युत्थानानन्तरं तेषां संसारोपि यदास्थितः ।
यदात्मदर्शनं नास्ति संसारोऽबाधितस्ततः ॥ २० ॥

व्युत्थानेति । तेषां मूढसमाध्यादिसुषुप्त्यन्तावस्थाचतुष्कस्थितानां व्युत्थानानन्तरं तत्तदवस्थातो व्युत्थानं देहादिव्यापारप्रवृत्तिस्तस्मादनन्तरं पश्चात्संसारोपि सुखदुःखजन्ममरणादिरूपा संसृतिरपि यद्यतः कारणादास्थितोऽभिव्याप्यान्तःकरणं स्थितो विद्यमान इत्यर्थः, दृश्यते इति शेषः। ननु मूढसमाध्यादिसुषुप्त्यन्तास्ववस्थास्विव व्युत्थानानन्तरं दृश्यप्रतीतिस्तुर्येपि समानैवेति पूर्वावस्थाचतुष्कतुर्ययोः को विशेषो येन तुर्यस्य मुक्तिरूपत्वमन्यासां नेत्युच्यत इत्याशङ्क्य व्युत्थानकाले संसारप्रतीतौ समायामपि दृश्यसंसारबाधिताबाधितत्वलक्षणं तयोर्वैलक्षण्यं दर्शयति यदिति, यद्यतः कारणान्मूढसमाध्यादिसुषुप्त्यन्तावस्थाचतुष्क आत्मदर्शनमात्मनः सच्चिदानन्दघनस्य स्वस्य दर्शनं ज्ञानं नास्ति न विद्यते ततस्तस्मात्कारणात्तास्ववस्थासु संसारो जन्मादिरूपोऽबाधितोऽसत्त्वदृष्ट्या नावलोकितः स्थितो वर्त्तत इति शेषः, अतः पूर्वावस्थाचतुष्के संसारभानाभावमात्रेण न तु सिद्धिः, तुर्ये च तत्सत्त्वेपि

पुनर्भूयः समायाति आगच्छति तदा तस्मिन्समये तस्माद्रज्ज्वाव-र्तसर्पादसौ देवदत्ताद्यभिधः पुरुषो बिभेति भीतिं प्राप्नोति ॥२५॥

नायं सर्प इति ज्ञात्वा यदि देशान्तरं गतः।

यदा पुनः समायाति तदा तस्माद्बिभेति न ॥२६॥

नायमिति। स देवदत्ताद्यभिधः पुरुषो रज्जुसर्पभ्रान्ति-स्थले स्थित्वा दीपादिकमानीय रज्जुं दृष्ट्वाऽयं मद्दृष्टिगोचरः सर्पः सर्पो न भवति किन्तुरज्जुरेवेयमित्येवं ज्ञात्वाऽनुभूय यदि यर्हि देशान्तरमन्यस्थानं गतः प्राप्तः, तत्र च कार्यं कृत्वा यदा यस्मिन्समये पुनर्भूयः समायाति आगच्छति तदा तस्मिन्काले सर्पस्य बाधितत्वान्मिथ्यात्वेनावलोकितत्वान्मिथ्यात्वेनापि स्मृ-तिमायाते सर्पे प्रतीयमाने सत्यपि तस्मात्सर्पान्न बिभेति भयं न प्राप्नोति यथा यद्वत् ॥ २६ ॥

दार्ष्टान्तिकमाह द्वाभ्याम्।

तथा मूढसमाधानाद्गतः संसारविस्मृतिम्।

यदा व्युत्थानमाप्नोति तदा संसारजं भयम् ॥२७॥

तथेति। तथा तद्वन्मूढसमाधानान्मूढत्वपूर्वकं यत्समाधानं भवप्रत्ययसंज्ञकं तस्माद्धेतोः संसारविस्मृतिं संसारस्य जन्ममर-णादिरूपप्रपञ्चस्य विस्मृतिं विस्मरणमभानमित्यर्थः, गतः प्राप्तो भवति, स पुरुषो यदा यस्मिन्समये व्युत्थानं प्रपञ्चस्फुरणरूपं जागरणं ततः समाधेराप्नोति आयाति तदेत्यध्याहार्यं तदा तस्मिन्काले संसारजं संसाराज्जन्ममरणादिरूपाज्जातं भयं भीतिं प्राप्नोति ॥ २७ ॥

किञ्च।

यदि विद्वत्समाधानाद्गतः संसारविस्मृतिम्।

यदा व्युत्थानमाप्नोति बाधितत्वाद्बिभेति न ॥२८॥

यदीति। स पुरुषो यदि यर्हि विद्वत्समाधानाज्ज्ञानपूर्वं यत्समाधानं समाधिस्तस्माद्धेतोः संसारविस्मृतिं संसारस्य जन्ममरणसुखदुःखादिरूपस्य प्रपञ्चस्य विस्मृतिमभानं गतः प्राप्तो भवति, स च यदा यस्मिन्समये ततः समाधेर्व्युत्थानं प्रपञ्चस्फुरणरूपं जागरणामाप्नोति आयाति तदेत्यध्याहार्यं तदा तस्मिन्समये प्रपञ्चस्य पूर्वसंस्कारेण प्रतीतावपि बाधितत्वादसत्त्वेन निश्चितत्वान्न बिभेति भयं न प्राप्नोति ॥ २८ ॥

ननु प्रपञ्चविस्मरणादेव कृतार्थता न बाधितत्वेनावलोकनादित्याग्रहं कुर्वाणं प्रत्याह।

यदि विस्मरणादेव मुक्तिर्भवितिति देहिनः।
सुषुप्तिर्जायते नित्यं तया मुक्तो न किं भवेत्॥२९॥

यदीति। यदीति सम्भावनायां देहाभिमानिनो जीवस्य विस्मरणादेव प्रपञ्चभानाभावादेव केवलं ज्ञानं विना मुक्तिर्मोक्षो भवेदिति सम्भाव्यते, तर्हि तदा नित्यं सर्वदैव सुषुप्तिर्निद्रा जायते भवति तत्र प्रपञ्चविस्मृतिसत्त्वेपि विना बोधतया सुषुप्त्या मुक्तो मोक्षं प्राप्तो न किं भवेत्कुतो न भवेन्न स्याद्यदि विस्मृत्यैव कृतार्थता स्यात्तर्ह्यलं गुरुसेवादिप्रयत्नैरितिभावः ॥ २९ ॥

तस्मात्तुरीया सर्वासामुत्तमा च विलक्षणा।
षडप्यवस्था एतस्याः कलां नार्हन्ति षोडशीम्॥३०॥

तस्मादिति। तस्मात्कारणात्सर्वासां सर्वावस्थानां मध्ये तुरीया तुर्यावस्थोत्तमा श्रेष्ठा विलक्षणा लक्षणैरपि भिन्नास्ति, तदेवोक्तं तुर्यश्रैष्ठ्यं पुनर्द्रढयति षडपीति, षडपि षड्संख्याका

अपि जाग्रत्स्वप्नसुषुप्तिमूर्च्छामृत्युमूढसमाध्याख्या अवस्था एतस्यास्तुरीयाया अवस्थायाः षोडशीं षोडशसंख्याकां कलामंशं नार्हंति नाप्नुवन्ति अतस्तुर्यावस्था सर्वावस्थासु श्रेष्ठेति ज्ञेया॥३०॥

सा च श्रद्धादिसाधनैर्विना कर्मभिस्तत्साध्येषु लोकेषु न लभ्यत इत्याशयेनाह ।

आब्रह्मकल्पं गरुडो यदि धावेत्सवेगतः ।
न चाप्नोति तथाप्येनं दूराद्दूरतरैव सा ॥ ३१ ॥

आब्रह्मेति । गरुडो वैनतेय आब्रह्मकल्पं ब्रह्मणो विरिञ्चेः कल्पं नाशमाऽभिव्याप्येत्याब्रह्मकल्पं द्विपरार्धकालपर्यन्तमित्यर्थः, सवेगतः स्वसंभ्रमेण सह धावेत शीघ्रं गच्छेद्यदि यर्हि तथापि तर्ह्यपि सा तुर्यावस्थैनं गरुडं न चाप्नोति नैव प्राप्नोति च पुनर्दूराद्दूरतरैव दूरतोपि दूरा भवति विना ज्ञानादिसाधनैर्न प्राप्यत इति भावः । तर्हि कैः साधनैः प्राप्यत इत्याशङ्क्य तानि दर्शयति ।

श्रद्धा यद्यस्ति वेदान्ते तीव्रा यदि मुमुक्षुता ।
ध्यानाभ्यासस्तथा गाढः सर्वत्र सुलभैव सा ॥३२॥

श्रद्धेति । कस्यापि पुरुषस्य वेदान्ते वेदान्तशास्त्रे श्रद्धा विश्वासरूपान्तःकरणवृत्तिर्यदि यर्हि स्याद्भवेत्तथैव तद्वदेव तीव्राऽनवच्छिन्ना दृढेत्यर्थः, मुमुक्षुता मोक्षेच्छुत्वं यदि यर्हि स्याद्भवेत्तथा तद्वद्गाढो दृढो निरन्तर इत्यर्थः, ध्यानाभ्यासो ध्यानं विजातीयप्रत्ययानन्तरितसजातीयात्मप्रत्ययप्रवाहरूपं तस्मिन्नभ्यासः पुनः पुनरावर्त्तनरूपो यदि यर्हि स्याद्भवेत्तर्हि सा तुर्यावस्था सर्वत्र स्ववासस्थानेऽन्यत्र ब्रह्मलोकादिनरकान्तस्थाने-

ष्वपि, यद्वा सर्वत्र स्वस्य जाग्रदादिषडवस्थास्वपीत्यर्थः, सुलभैव सुखेन लब्धुं शक्येत्यर्थः, स्वरूपत्वादिति भावः ॥ ३२ ॥

उक्तावस्थासु मध्ये तिसृणां निष्फलतामाह ।

मृत्युमूर्च्छासुषुप्तिश्च न तपस्तेन निष्फलाः ।
रूढमूढसमाधानं तप उग्रं महाफलम् ॥ ३३ ॥

मृत्युरिति। मृत्युर्मरणावस्था पीडादिना देहाद्यज्ञानरूपा मूर्च्छावस्था सुषुप्तिश्च निद्रापि लोकप्रसिद्धा—एतास्तिस्रोऽवस्था न तपः। तप इत्युपलक्षणं पारलौकिककर्माद्यभावेनैहिकसुखसाधनकर्माद्यभावाच्च तेन कारणेन निष्फला निष्प्रयोजना भवन्ति अतस्तासु अतीवानादरः कर्तव्य इति भावः, सांसारिकफलेप्सुभिस्तु मूढसमाधावेवादरो विधेयो न मुमुक्षुभिरित्याशयेनाह रूढेति, रूढमूढसमाधानं रूढं प्राप्तं मूढत्वपूर्वकं समाधानं समाधिरुग्रं शापानुग्रहसामर्थ्यजनकमतो महाफलं महच्छ्रेष्ठं फलं राज्यादिकं यस्मात्तत्तथोक्तं तपस्तपो भवति अतस्तत्र सांसारिकफलेप्सुभिरेवादरो विधेयो न मुमुक्षुभिरिति भावः ॥ ३३ ॥

मुमुक्षुभिस्तु तुर्यायामेवादरो विधेय इत्याशयेन तुर्यास्वरूपं तत्फलं च निरूपयति ।

विद्या विद्वत्समाधिस्तु तेन मोक्षप्रदो हि सः ।
सप्तानामप्यवस्थानामेवंरूपा व्यवस्थितिः ॥३४॥

विद्येति। विद्वत्समाधिस्तु विदुषां ज्ञानिनां समाधिः सम्यं ब्रह्माऽऽधीयते साक्षात्क्रियतेऽस्मिन्निति समाधिस्तुर्यावस्था तुपदेन मूढसमाधेरस्यातिवैलक्षण्यं सूचितं, विद्या ज्ञानमेवास्ति स विद्वत्समाधिस्तेन विद्यारूपत्वेन मोक्षप्रदो मोक्षस्य मुक्तेः प्रदो दाता भवति हि प्रसिद्धमेतद्विद्वत्सु अतो मुमुक्षुभिरत्रैवादरो

विधेय इति भावः, उक्तमवस्थानिर्णयमुपसंहरति सप्तानामिति, हे शिष्य सप्तानामपि सप्तसंख्याकानामपि अवस्थानां स्थितीनां व्यवस्थितिर्व्यवस्था मर्यादेत्यर्थः, एवंरूपैवमीदृशं रूपं स्वरूपं यस्याः सा तथोक्ता ज्ञेया ॥ ३४ ॥

एवं सप्ताप्यवस्था निरूप्येदानीमेतत्सप्तावस्थानिरूपणं सप्तावस्थावच्चित्तसाक्षिचिन्मात्रज्ञानार्थं निरूपितमिति द्योतयति ।

सप्तावस्था इमाः सन्ति चित्तस्यैव चितेस्तु न ।
अवस्थाभवनं चित्तमवस्थासाक्षिणी तु चित् ॥ ३५ ॥

सप्तेति । इमा निरूपिताः सप्त सप्तसंख्या अवस्था भूमयश्चित्तस्यैवान्तःकरणस्यैव सन्ति विद्यन्ते, चितस्तु अवस्थासाक्षिचिन्मात्रस्यात्मवस्तुनस्तुपदेनात्मनोऽन्तःकरणान्महद्वैलक्षण्यं सूचितं, नैव सन्ति । कुतः इत्यत आहावस्थेति, अवस्थाभवनमवस्थानां जाग्रदादितुरीयान्तानां स्थितीनां भवनं क्षेत्रं गृहं वोतत्पादकत्वान्निवासत्वाच्च चित्तमन्तःकरणमस्ति चिच्चैतन्यं तद्विलक्षणाऽस्ति, तदेव वैलक्षण्यमाहाऽवस्थेति, अवस्थासाक्षिण्यवस्थानां सप्तानां भूमीनां साक्षिण्यव्यवधानेन प्रकाशिकाऽस्ति ॥ ३५ ॥

एतत्प्रकरणाभ्यासफलमाह ।

अवस्थानां व्यवस्थेयं यदि भूयो विभाव्यते ।
अवस्थानां तदा साक्षी साक्षात्प्रत्यक्षमीक्षते ॥ ३६ ॥

अवस्थानामिति । यदि यर्हीयं निरूपिताऽवस्थानां सप्त संख्याकानां स्थितीनां व्यवस्था व्यवस्थितिर्मर्यादेत्यर्थः, भूयः पुनः पुनर्विभाव्यते विचार्यते तदा तर्हि अवस्थानां जाग्रदादीनां सप्तावस्थानामेतद्विचारकः साक्षी साक्षादव्यवधानेन प्र-

काशकश्चिन्मात्ररूपोऽहमस्मीति साक्षात्प्रत्यक्षमेव स्वयं प्रत्यक्षमपरोक्षं यथा तथेक्षते पश्यति जानातीत्यर्थः, अतो मुमुक्षुभिः सर्वदैवेयं विचार्येति भावः ॥ ३८ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्ता-
वस्थाऽव्यवस्थार्थप्रकाशः पञ्चदशः ॥ १५ ॥

अथमुनीन्द्रदिनचर्या ।

एवमवस्थाऽव्यवस्थां निरूप्येदानीं तत्फलभूतचिन्मात्रस्वरूपेऽवस्थाऽवस्थातत्साक्षिणि मनःस्थिरतासिद्ध्यै मुनीन्द्रदिनचर्यामिषेण तत्स्वरूपं निरूपयिष्यन्मुनीन्द्रदिनचर्याख्यं सार्धद्व्यशीत्युत्तरशतश्लोकं प्रकरणमारभते, तत्र चावान्तरप्रकरणानि जागरण शौच प्रातःस्मरण स्नानकाल स्नान वस्त्रधारण पवित्रादिधारणाचमन प्रातःसंध्या प्राणायामार्घदान गायत्रीजपोपस्थान सहोमाङ्गहोम यज्ञशालादिप्रायश्चित्ताग्न्युद्धरणहोमाहुत्यन्तब्रह्मयज्ञ तर्पण देवपूजा देवपूजोपयुक्तशास्त्रार्थ पञ्चमहायज्ञोपयज्ञ दान मध्यान्हसंध्या वैश्वदेव बलिदान भोजन ताम्बूलग्रहणवामकुक्षिशयन पुराण सायंसंध्या रात्रिकृत्य दिनचर्याफलनिर्णयाख्यानि क्रमेण त्रि चतुः पञ्च त्र्यैकैक सार्धद्व्येक सार्धत्रि षोडश त्रि चतुर्द्वि पञ्चदश पञ्चैक चतुर्दश सप्तैक त्र्यैकैकैकैकैकैक द्वि सार्द्धद्वासप्तति द्वि द्वि त्रीणि श्लोकानि क्रमेणोपन्यस्तानि, तत्र तावत्तां मुनीन्द्रदिनचर्यां प्रतिज्ञातां निरूपयितुं प्रतिजानीते ।

अथ मुनीन्द्रदिनचर्या ।

अथेति । अथावस्थाऽव्यवस्थानिरूपणानन्तरं मुनीन्द्रदिनचर्या मुनयो मननवन्तस्तेषामिन्द्राः श्रेष्ठास्तेषां दिनं वक्ष्यमाणमहस्तस्य

सम्बन्धिनी चर्याऽऽचारो मुनिसम्बन्धिदिवसे मुनीनामेवाचार इत्यर्थः, निरूप्यत इति शेषः। एवं प्रकरणनिरूपणं प्रतिज्ञायेदानीं मुनीन्द्रदिनचर्यानिरूपणे स्वप्रयोजनमाह।

विचित्राक्षरविन्यासैः पवित्रार्थकथारसैः।
पावयामि निजां वाणीं मुनीन्द्रदिनचर्यया॥ १॥

विचित्रेति। अहं विचित्राक्षरविन्यासैर्विचित्रा अक्षराणां विन्यासा वर्णस्थापना येषु पदेषु तैस्तथा पवित्रार्थकथारसैः पवित्रोऽर्थो यासां कथानां तास्तथोक्ताः कथास्तासां कथानां रसाः सुखविशेषा यत्र विद्यन्ते तथाभूतैः पदैर्युक्तयेति शेषः, मुनीन्द्रदिनचर्यया मुनीन्द्रा मुनिश्रेष्ठाः पञ्चमभूमिकाद्यारूढास्तेषां दिनं स्वात्मनः साक्षात्प्रकाशरूपं तत्र या चर्याऽऽचारस्तया तत्प्रतिपादकेन प्रकरणेनेत्यर्थः, निजां स्वीयां वाणीं भाषां पावयामि पवित्रां करोमि, एतदेव स्वप्रयोजनमिति भावः॥ १॥

एवं स्वप्रयोजनमभिधायेदानीमेतत्प्रकरणस्य प्रामाण्यायैतत्संप्रदायज्ञानाय च गौरीमहेश्वरसंवादेनैतत्प्राकट्यं दर्शयति।

गौरीं महेश्वरः प्राह चिदानन्दमयीं स्थितिम्।
वदामि तन्मतच्छायां दिनचर्यापदेशतः॥ २॥

गौरीमिति। महेश्वरो महान्ब्रह्मादिष्वतिश्रेष्ठः स चासावीश्वरः सर्वनियन्ता सदाशिव इत्यर्थः, गौरीं पार्वतीं प्रति चिदानन्दमयीं चिच्चैत्यरहितं चिन्मात्रं तदभिन्नो य आनदस्तद्रूपां स्थितिमवस्थां प्राधान्ये मयट् प्राहोक्तवानहमपि अत्र प्रकरणे दिनचर्यापदेशतो दिनस्य मुनीन्द्रसम्बन्धिदिवसस्य चर्या मुनीन्द्राणामेवाचारस्तस्या अपदेशो व्याजं तेन कृत्वा सार्वविभक्तिकस्तसिः, तन्मतच्छायां तस्य शिवस्य यन्मतं चिदभिन्नसु-

स्वनिरूपकाभिप्रायस्तस्य च्छायामंशमात्रमित्यर्थः, वदामि कथयामि अत एतत्प्रकरणनिरूप्यार्थस्य प्रामाण्यमिति भावः ॥ २ ॥

इदानीं मुनीन्द्राणां दिनचर्यां निरूपयितुं मुनीन्द्रदिनबोधनाय तत्प्रातर्जागरणं लक्षयति ।

यस्मिञ्जागरणे प्राप्ते पुनर्निद्रा न जायते ।
सुमङ्गलं मुनींद्राणां प्रातर्जागरणं हि तत् ॥ ३ ॥

इति बो० मुनीन्द्र० प्रातर्जागरणनिर्णयः प्रथमः ॥ १ ॥

यस्मिन्निति । लौकिकार्थस्तावद्यस्मिन्प्रसिद्धे लौकिके जागरण इन्द्रियैरर्थोपलब्धिर्जागरितमित्युक्तलक्षणे जागरिते प्राप्ते लब्धे सति पुनर्भूयस्तद्दिने निद्रा सुषुप्तिरिन्द्रियैः सहान्तःकरणस्य कारणाज्ञानमात्रस्थितिः सुषुप्तिरित्युक्तलक्षणा न जायते न भवति तदुक्तलक्षणं मुनीन्द्राणां श्रेष्ठकर्मशास्त्रज्ञानिनां विधिनिषेधज्ञानवतामित्यर्थः, प्रातर्जागरणं सूर्योदयात्प्रागुपलक्षिते प्रातः प्रभाते जागरणं जागृतिर्ज्ञेयं हि प्रसिद्धमेतत्सर्वजनेष्वित्यर्थः, प्रकृतेर्थे तु यस्मिन्प्रपञ्चप्रसिद्धविलक्षणे जागरणे स्वस्वरूपस्फुरणलक्षणे जागरिते 'यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति यो जागार तमयं सोम आह तवाहमस्मि सख्येन्योकाः', इति श्रुतेः ।

'या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशापश्यतो मुनेः' ॥ इति ।

स्मृतेश्च, प्राप्ते लब्धे सति सोहमिति स्वात्मन्यनुसंहिते सतीत्यर्थः, पुनर्भूयो निद्रा स्वरूपास्फुरणरूपा सुप्तिर्लोकप्रसिद्धा निद्रापि न जायते न प्रादुर्भवति सत्त्ववती न भवतीत्यर्थः, मुनीन्द्राणां मननशीलेषु श्रेष्ठानां पञ्चम्याद्या-

रूढानामित्यर्थः, सुमङ्गलं शोभनं मङ्गलं मोक्षरूपं यत्र तदुक्तलक्षणं प्रातर्जागरणं चिदादित्योदयोपलक्षिताहं ब्रह्मास्मीति वृत्तौ भवं प्राभातिकं जागरणं जागृतिर्भवति हि एतद्विद्वत्सु प्रसिद्धमित्यर्थः ॥ ३ ॥

इति श्रीनरहरिशिष्यदि० बोधसारा० मुनीन्द्रदिनचर्यार्थप्रकाशे प्रातर्जागरणार्थप्रकाशः प्रथमः ॥ १ ॥

अथ शौचनिर्णयः।

एवं मुनीन्द्राणां जागरणं निर्णीयेदानीं तेषामेव शौचं निर्णेतुं मुनीन्द्रशौचनिर्णयाख्यं चतुःश्लोकं प्रकरणमारभते, तत्रादौ मुनीन्द्राणां शौचं प्रदर्शयितुमशौचकारणमाह।

देहेन्द्रियमनःप्राणबुद्ध्यहङ्कारचेतसि।
अशुचावात्मभावोऽसावशुचित्वस्य कारणम् ॥१॥

देहेति। देहेन्द्रियमनःप्राणबुद्ध्यहङ्कारचेतसि देहश्च कायः, इन्द्रियाणि च श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि पञ्च शब्दस्पर्शरूपरसगन्धज्ञानकरणानि, वाक्पाणिपादपायूपस्थाख्यानि पञ्च वचनादानगमनविसर्गानन्दाख्यक्रियासाधनानि, मनश्च संशयरूपान्तःकरणवृत्तिः, बुद्धिश्च निश्चयात्मिकान्तःकरणवृत्तिः, अहङ्कारश्चैतेषु तादात्म्यभ्रमरूपान्तःकरणवृत्तिः, चेतश्च स्मृतिप्रत्यभिज्ञानुभवकरणरूपान्तःकरणवृत्तिः, एतेषां समाहारे द्वन्द्व एकवद्भाव एकवचनान्तप्रयोगः, एतस्मिन्समूह आविद्यकत्वेन मलिनत्वादशुचावशुद्धे य आत्मभाव आत्मानं विस्मृत्यात्मनः सत्तां तत्रारोप्य तस्मिन्नात्मप्रतीतिरसौ सोऽनात्मन्यात्मभावोऽशुचित्वस्य परमशुद्धात्मन्यशुद्धतायाः कारणं निमित्तं

भवति अतः शौचमपेक्षितमिति भावः, लोके तावद्देहे विड्मूत्रादिना मलिनद्रव्येण लिप्ते सति अशुचित्वं यत्प्रतीयते, इन्द्रियेषु चाशुचिशब्दादिश्रवणादिनाऽशुचित्वस्फूर्त्याऽशुचित्वं, मनसि प्राणे च तेषामशुचित्वसङ्कल्पादिनाऽशुचित्वं, बुद्धौ च तेषामशुचित्वनिश्चय एवाशुचित्वम्, अहङ्कारे च तेषु आत्मतादात्म्येनाहमशुचिरित्यशुचित्वं, चेतसि तु तेषामहङ्कारादिदेहान्तानामशुचित्वानुसन्धानरूपमशुचित्वम्, इदमेव सर्वमशुचित्वस्य कारणं भवति अत एवैतदनुसन्धानाभाव आबालगोपमाशौचविध्यभावोपि दृश्यत इति भावः ॥ १ ॥

एवमशुचित्वकारणं निरूप्येदानीं शौचं विधत्ते ।

साक्षित्वभावनातोयैस्तथा वैराग्यमृत्स्नया ।
गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रितः ॥ २ ॥

साक्षित्वेति । यथा लोके निर्मलोदकेन शुद्धमृदा च मलमूत्रादिधावनपूर्वकं तद्गन्धनिवृत्तिपर्यन्तं गुदहस्तपादादिप्रक्षालनरूपं शौचमालस्यं परित्यज्य क्रियते तद्वदत्र अतन्द्रितोऽनलसो भूत्वेति शेषः, आलस्यं परित्यज्य प्रवर्त्तमान इत्यर्थः, एतादृशो मुनिः साक्षित्वभावनातोयैर्देहादिचित्तान्तेषु यत्साक्षित्वं साक्षादव्यवधानेन प्रकाशयितृत्वं स्वस्य तस्य भावना चिन्तनमखण्डसच्चिदानन्द आत्माहमितिअनुसन्धानमित्यर्थः, तदेव सर्वमलक्षालकत्वात्तोयानि जलानि तैः कृत्वा तथा तद्वद्वैराग्यमृत्स्नया विगतो रागो यस्मात्स विरागो ब्रह्मलोकान्तसर्वविषयेषु विरसस्तस्य भावो वैराग्यं देहादिचित्तान्तेष्वनात्मपदार्थेषु विरसत्वमित्यर्थः, तदेव तेषु स्वस्य वासनारूपगन्धनिवर्त्तकत्वान्मृत्स्ना प्रशस्ता मृत्तया 'प्रशस्ता तु मृत्स्ना मृत्सा च मृ-

त्तिके' अमरसिंहः, गन्धलेपक्षयकरं गन्धस्याहङ्कारचित्तादिदेहान्तेषु अनात्मभूतेषु वासना एव गन्धवत्तदाश्रयद्रव्यस्मारकत्वाद्गन्धस्तस्य लेपः सम्बन्धः स्वस्मिन्तेषां साक्षिभूते पूर्वकालिकतादात्म्याध्याससंस्कारेण स्फुरणात्तद्वत्वप्रतीतिरूपस्तस्य क्षयो नाशस्तस्य करं कारकमिति शौचविशेषणं शौचमनात्मभूतदेहादिचित्तान्तपदार्थानां सत्त्वपूर्वकस्फूर्तिनिरासरूपं शुद्धात्मस्फूर्तिरूपं वा कुर्यात्सम्पादयेद्, यद्वा गन्धलेपक्षयकरमिति क्रियाविशेषणं तस्मिंश्च पक्षे गन्धलेपक्षयकरं यथा भवति तथा शौचं सम्पादयेदित्यर्थः ॥ २ ॥

एवं पादादिप्रक्षालनरूपशौचवन्मुनीनां पूर्वाङ्गभूतं शौचं निरूप्येदानीं मङ्गलपदार्थदर्शनस्पर्शनलक्षणशौचवच्छौचं मुनिसम्बन्धि दर्शयति अर्धेन ।

एवं विधेन विधिना यत्सर्वं मंगलार्जनम् ।
एतदेव मुनीन्द्राणां प्रातःशौचं विशुद्धिकृत् ॥३॥

एवमिति । एवं विधेनोक्तप्रकारेण विधिना शौचानुष्ठानेन यद्यादृशं सर्वं सर्वशब्दवाच्यं द्वैतजातं व्यवहारकाले समाधिकाले च तद्बाधेन ब्रह्मैव प्रतीयते तद् 'सर्वं खल्विदं ब्रह्मे'तिश्रुतिदृष्ट्या ब्रह्मैवेति मङ्गलार्जनं मङ्गलस्य शुभस्यार्जनं सम्पादनमेव ज्ञेयं, उक्तं शौचमुपसंहरति एतदेवेति, मुनीन्द्राणां श्रेष्ठमुनीनां पञ्चम्यादिभूमिकारूढानामित्यर्थः, विशुद्धिकृद्देहादिमलनिरासकत्वादत्यन्तशुद्धिकारकं प्रातःशौचं लौकिकप्रातःशौचवत्प्रातर्ज्ञानसूर्योदयोपलक्षितपञ्चम्यारोहणलक्षणे प्रातःकाले शौचं शुद्धिकारणं कर्मैतदेवोक्तलक्षणमिदमेव ज्ञेयं नान्यल्लोकप्रसिद्धं गुदहस्तपादादिप्रक्षालनरूपं दर्पणधेनुसूर्यादिदर्शनरूपमङ्गलार्जनरूपं वा तत्तु सर्वं लौकिकमात्रमिति भावः॥३॥

एवं हस्तपादादिप्रक्षालनशौचवच्छौचं मङ्गलपदार्थदर्शनस्पर्शनं च मुनीनां निरूप्येदानीं मुखप्रक्षालनं मुनीनामाह ।

ज्ञानयोगप्रसन्नानां मुमुक्षा मुखमुच्यते ।
श्रद्धाजलेन तच्छुद्धिर्मुखप्रक्षालनं हि तत् ॥ ४ ॥

ज्ञानयोगेति । लोके तावत्प्रसिद्धमुखस्यैव प्रसिद्धजलदन्तमार्जनचूर्णादिना शुद्धिः प्रसिद्धा, ज्ञानिनां त्वेतद्विलक्षणा ज्ञानयोगप्रसन्नानां ज्ञानमेव जीवब्रह्मैक्यप्रमारूपं महावाक्यजन्यं ज्ञानमेव जीवब्रह्मयोगकारणत्वाद्योगस्तस्मिन्तेन वा प्रसन्नानां शुद्धान्तःकरणानां वैराग्यपूर्वकतदभ्यासनिष्ठानामित्यर्थः, मुमुक्षा तीव्रा मोक्षेच्छा प्रथमभूम्यारूढचित्तवृत्तिरेव मुखं भोजनसाधनं मुखमिव 'चेतो मुख' इति श्रुतेः, मुक्तिसुखभोजनसाधनत्वान्मुखमुच्यते कथ्यते विद्वद्भिरिति शेषः, एवं ज्ञानिनां मुखं प्रदर्श्येदानीं मुनीन्द्राणां तत्प्रक्षालनमाह श्रद्धेति, श्रद्धाजलेन मुमुक्षाख्यभूम्युत्तरभूमिका विचारणादिकास्तदभ्यासे श्रद्धा विश्वासः सैव मोक्षेच्छानिवृत्तिक्रमेण मोक्षप्राप्त्याऽत्यन्ततत्प्रक्षालकत्वाज्जलमिव जलं तेन तच्छुद्धिस्तस्य मुमुक्षाख्यमुखस्य शुद्धिर्मलनिवृत्तिर्भवतीति शेषः, नित्यमुक्तत्वनिश्चयेन स्वस्मिन्मुक्तीच्छाभाववत्त्वं भवतीत्यर्थः, तदुक्तलक्षणं मुखप्रक्षालनं मुखधावनं हि ज्ञानिषु प्रसिद्धं ज्ञेयं, प्रसिद्धमुखप्रक्षालनं तु व्यवहारयोग्यतामात्रापादकमिति भावः ॥ ४ ॥

इति श्रीनरहरिशिष्यवि० मुनीन्द्रदिनचर्यार्थप्रकाशे शौचनिर्णयार्थप्रकाशो द्वितीयः ॥ २ ॥

अथ प्रातःस्मरणम् ।

एवं मुनीन्द्राणां प्रातःशौचं निर्णीयेदानीं तेषामेव प्रातःस्मरणं

निर्णेतुं प्रातःस्मरणनिर्णयाख्यं प्रकरणं पञ्चश्लोकमभिदधान आह—

प्रातः स्मरन्ति मुनयो देवस्य सवितुर्महः ।
वरेण्यं तद्धियः साक्षि तदेवास्मीति संततम् ॥१॥

अथेति । अथ प्रातःशौचनिर्णयानन्तरं प्रातःस्मरणं मुनीन्द्राणामेव प्रातः प्रभाते ज्ञानसूर्योदयात्प्रागुपलक्षिते पञ्चमभूम्युदये तदारूढवृत्तौ स्मरणं चिन्तनं कथ्यत इति शेषः, लोके हि देवताग्रहपुण्यकर्मपुरुषादिस्मरणं क्रियते यथा तथा मुनीनामपि स्मर्तव्येष्टदेवतास्वरूपं निरूपयिष्यन्तत्स्मरणाय श्लोकानुदाहरति, तत्रादौ गायत्र्यर्थद्वारा तत्प्रतिपाद्यसर्वजगत्कारणत्वाद्युपलक्षितब्रह्माभिन्नात्मस्मरणमनुसन्धापयति प्रातरिति, मुनयः पञ्चम्याद्यारूढा जातसाक्षात्कारा इत्यर्थः, प्रातः स्वात्मसूर्योदयोपलक्षितकालात्माकालः प्रातःकालस्तस्मिन्पञ्चम्यारोहणसमय इत्यर्थः, सवितुर्मायोत्पादनशीलस्य सर्वजगत्कारणस्येत्यर्थः, देवस्य स्वतो द्योतमानस्य स्वयं प्रकाशस्येत्यर्थः, तस्यचिन्मात्ररूपस्यात्मनस्तच्छ्रुतिभिः परोक्षत्वेन निर्दिष्टं वरेण्यं वरणमङ्गीकारस्तद्योग्यं सुखरूपत्वात्सर्वजनप्रार्थनाविषयमित्यर्थः, महश्चिद्रूपत्वात्प्रकाशरूपं तेज इव तेजः कर्मभूतं धियः समष्टिबुद्धेः साक्षि अव्यवहितप्रकाशकं तदेव सर्वजगत्प्रकाशकत्वादिलक्षणैरुपलक्षितमेवातः सर्वबुद्धिसाक्षित्वात्तस्य स्वस्य च व्यष्टिबुद्धिसाक्षित्वेन साक्षिमात्रत्वस्योभयत्रैक्यात्तत्पदलक्ष्यं ब्रह्मचैतन्यमेवाहम्पदलक्ष्यं कूटस्थचैतन्यमस्मि भवामीति एवं प्रकारेण स्मरन्ति अनुसन्दधतीति विद्वत्पक्षेऽर्थः, उपासनापक्षे तु मुनय उपासनाशास्त्रद्वारोपासनाज्ञानवन्त इत्यर्थः, प्रातः सूर्योदयात्प्रागुपलक्षिते प्रभाते तद् 'येनसूर्यज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुने'ति श्रुत्या तमोबाधनसर्वजगत्प्रकाशकत्वादिगुणविशिष्टं निरूपितं वरेण्यं सर्वै-

र्व्यवहारिजनैर्व्यवहारोपयोगितयैष्टव्यं यतो धियः साक्षि धियो ज्ञानेंद्रियविशेषस्य चक्षुषः साक्षि साक्षादव्यवधानेन प्रकाशकं सवितुः सूर्यस्य देवस्य प्रकाशरूपस्य महस्तेजस्तदेवोक्तलक्षणमेव तेजोऽहं चक्षुःक्रियाभिमानी द्रष्टा चक्षुषः पृथगसत्त्वेन द्रष्टुरपि तथात्वात्सूर्यतेजोमात्ररूप एव द्रष्टाहमस्मि भवामीत्येवं स्मरन्ति चिन्तयन्ति तेषां फलं सूर्यत्वप्राप्तिरूपं श्रुतिषूक्तं, ज्ञानिनान्तु पूर्वोक्तलक्षणेन स्मरणेन ब्रह्मत्वप्राप्तिरूपं फलं च भवतीति ज्ञेयम् ॥ १ ॥

इदानीं जाग्रत्स्वप्नसुषुप्त्याख्येऽवस्थात्रयेऽभिन्नत्वेन लक्षितेऽहम्पदलक्ष्येऽहम्पदवाच्यचिदाभासैक्यानुसन्धानलक्षणं प्रातःस्मरणं विदुषामाह ।

अन्वयव्यतिरेकाभ्यां जाग्रत्स्वप्नसुषुप्तिषु ।
यदेकं केवलं ज्ञानं तदेवाहमहं हि तत् ॥ २ ॥

अन्वयेति । जाग्रत्स्वप्नसुषुप्तिषु जाग्रच्चेन्द्रियैरर्थोपलब्धिर्जागरितमित्युक्तलक्षणा जागरावस्था, स्वप्नश्च जाग्रद्दृष्टश्रुतानुभूतविषयसंस्कारवासनावासितबुद्धौ प्रपञ्चाभासरूप इत्युक्तलक्षणा स्वप्नावस्था, सुषुप्तिश्च जाग्रत्स्वप्नविषयाकारवृत्तिभिः सहैव बुद्धेर्लयेन कारणाज्ञानमात्रात्मतया स्थितिरित्युक्तलक्षणा निद्रा, एतासु तिसृष्ववस्थासु अन्वयोऽनुवृत्तिर्ज्ञानस्य व्यतिरेको व्यावृत्तिरवस्थानां परस्परं ताभ्यां कृत्वा ज्ञानं विनाऽवस्थाप्रकाशाभावाज्ज्ञानस्यान्वयोऽवस्थासु अन्योन्यस्यामवस्थाऽभावदर्शनादवस्थानां व्यतिरेक इति विवेकस्ताभ्यामेव लक्षितं यत्केवलमभिन्नं ज्ञानमस्ति तदेवावस्थात्रयेण तद्गतत्रिपुटीभिश्चास्पृष्टत्वादभिन्नमत एव सजातीयविजातीयस्वगतभेदरहितं ज्ञानं कूटस्थचैतन्यमस्ति तदेवोक्तलक्षणं कूटस्थचैतन्यमेवाहमहम्प-

दवाच्यो देहद्वयविशिष्टश्चिदाभासोऽस्मि भवामि उपाधिविविक्तस्य चिदाभासस्य कूटस्थज्ञानाभिन्नत्वमुभयोर्लक्षणैक्यादिति भावः, अन्वयमुखेनोक्तं कूटस्थचिदाभासयोरैक्यं व्यतिरेकमुखेनाप्याहाऽहमिति, अहमहम्पदवाच्यश्चिदाभासस्तत्कूटस्थचैतन्यमस्मि भवामि हि एतच्चिदाभासकूटस्थचिदात्मनोरैक्यं यदुक्तं तद्विद्वत्सु श्रुतिष्वपि प्रसिद्धमिति द्योतितं हिपदेन।

'न पृथ्वी न जलं नाग्निर्न वायुर्द्यौर्न वा भवान्।
एषां साक्षिणमात्मानं चिद्रूपं विद्धि मुक्तये,॥
इत्यादिश्लोकैरयमेवार्थो विद्वद्भिः प्रदर्शितः। श्रुतयश्च,
'जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत्प्रकाशते।
तद्ब्रह्माऽहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते'।
इत्यादयश्चास्मिन्नर्थेऽनुसन्धातव्याः॥ २॥

इदानीं ज्ञानाज्ञानादिसर्वप्रपञ्चप्रकाशयितृत्वेन तस्मिन्नेवज्ञाने ब्रह्मलक्षणसम्भावनेन स्वस्मिन्नहम्पदवाच्ये चिदाभासे तदभिन्नत्वानुसन्धानरूपं विदुषां प्रातःस्मरणमाह।

ज्ञानाज्ञाने तद्विषयौ तदहङ्कार एव च।
प्रकाश्यन्ते येन भूम्ना तदहं ह्यहमेव तत्॥ ३॥

ज्ञानाज्ञाने इति। ज्ञानाज्ञाने ज्ञानं च घटपटादिप्रतीतिरूपमज्ञानं च पटाद्यभानरूपं ते उभे तद्विषयौ च तयोर्ज्ञानाज्ञानयोर्विषयौ ज्ञानविषयो ज्ञानप्रकाश्यो ज्ञातघटोऽज्ञानविषयोऽज्ञानावृतोऽज्ञातघटस्तौ च च पुनस्तदहङ्कारस्तयोर्ज्ञानाज्ञानयोरहङ्कारो ज्ञान्यहमज्ञान्यहमित्यपि एते सर्वे येन स्वयं प्रकाशत्वेन प्रसिद्धेन भूम्ना व्यापकेन चैतन्येन प्रकाश्यन्ते प्रकाशिता भवन्ति ज्ञानाज्ञानयोस्तत्सन्धौ च ज्ञाताज्ञातविषययोस्तत्सन्धौ

च ज्ञानाज्ञानाहम्भावयोस्तत्सन्धौ च तेषां सर्वेषां प्रकाशयितृत्वेन विद्यमानत्वात्सत्त्वं ज्ञात्रादित्रिपुटीनां तत्सन्धौ च भानरूपेणानुवृत्तत्वाद्व्यापकत्वं च तस्य ज्ञेयं, तद्ब्रमाख्यं चैतन्यमहमहम्पदवाच्यं साधिष्ठानमाभासचैतन्यं समष्ट्यहम्पदवाच्यचैतन्यतल्लक्ष्यसर्वजगत्प्रकाशकचैतन्ययोरैक्येन तस्य व्यष्ट्यहङ्कारादिसाक्षिचैतन्यस्य च प्रकाशमात्रलक्षणैक्यादभिन्नत्वं साक्षिचैतन्याहम्पदवाच्यचैतन्ययोरपि उपाधिनिरसनेन वास्तवमभिन्नत्वमिति भावः, अस्मि । अन्वयमुखेनोक्तं व्यतिरेकमुखेनाह्[1]ऽहमिति, अहमेव तदहम्पदवाच्याभिन्नस्तल्लक्ष्यः कूटस्थमात्रं तद्ब्रमाख्यचैतन्यमस्मि हि प्रसिद्धमिदं विदुषामित्यर्थः ॥ ३ ॥

इदानीं शरीरत्रयतदभिमानित्रयप्रकाशककूटस्थचैतन्यस्य शरीरत्रयनिरासेन तत्स्थचिदाभासस्य चैक्यानुसन्धानरूपं विदुषां प्रातःस्मरणमाह ।

विश्वश्च तैजसः प्राज्ञो नास्म्यहं सत्स्वरूपतः ।
यतस्ते तु प्रकाश्यन्ते तदहं नास्मि चेतरत् ॥ ४ ॥

विश्व इति । विश्वः स्थूलदेहतादात्म्यापन्नो जाग्रदभिमानी विश्व इत्युच्यते सोऽहं नास्मि न भवामि, तथा तैजसस्तेजोमयान्तःकरणरूपलिङ्गशरीरतादात्म्यापन्नः स्वप्नाभिमानी तैजस इत्युच्यते सोऽहं नास्मि न भवामि, तथा प्राज्ञश्च कारणशरीराभिमान्यहमज्ञ इत्यनुभववान्प्राज्ञ इत्युच्यते स च सोप्यहं नास्मि न भवामि, तत्र हेतुमाह सदिति, सत्स्वरूपतः सत्कालत्रयाबाध्यं स्वं स्वीयं रूपं यस्य स तथोक्तो, यद्वा सत्कालत्र-

१ ह्यहमेव तत् ।

याबाध्यं स्वं स्वतः सिद्धं स्वयमेव रूप्यत इति रूपः प्रकाशो यस्य स तथोक्तस्तादृशरूपत्वान्ममाऽतोऽहं ते न भवामीति योज्यं, विश्वादीनामन्योन्यस्मिन्व्यावृत्तत्वात्तत्सन्धौ च तेषामभावात्तदसत्वं मम तु तज्ज्ञत्वेन तेष्वनुस्यूतत्वात्तत्सन्धौ च सन्धिप्रकाशकत्वेन विद्यमानत्वात्सत्त्वमित्युभयोर्वैलक्षण्यस्यानुभूयमानत्वात्तेऽहं न भवामीति भावः, प्रकाश्यप्रकाशकत्वरूपं वैलक्षण्यमप्यनुसन्धत्ते यत इति, ते विश्वतैजसप्राज्ञा उक्तलक्षणा यतो यस्मान्निर्विकारचैतन्यात्प्रकाश्यन्ते प्रकाशिता भवन्ति तत्तु सर्वदेहादिज्ञानविलक्षणं चैतन्यं ब्रह्म विश्ववैश्वानरयोस्तदुपाध्योः समष्टिव्यष्टिस्थूलदेहयोश्च वनवृक्षयोस्तदवच्छिन्नाकाशयोश्चैक्यमिवैक्यात्तैजसहिरण्यगर्भयोश्च तदुपाध्योरपि समष्टिव्यष्टिलिङ्गशरीरयोर्वनवृक्षयोस्तदवच्छिन्नाकाशयोरैक्यवदैक्यात्तथा प्राज्ञेश्वरयोस्तदुपाध्योः समष्टिव्यष्टिकारणशरीरयोरपि तथैक्यात्प्राज्ञादीनां प्रकाशकचैतन्यस्यैव वैश्वानरादीनामपि प्रकाशकत्वाद्ब्रह्मत्वमतो ब्रह्माभिन्नं तद्विश्वादिप्रकाशकं कूटस्थचैतन्यमहमहम्पदवाच्यार्थनिरासेनास्मि भवामि, इतरत्कूटस्थचैतन्यादितरद्भिन्नं चिदाभासरूपं विश्वादिरूपं वा तदुपाधिजातं वा तद्भिन्नं ब्रह्म वा ततश्च भिन्नं कूटस्थचैतन्यं वा ब्रह्मप्रकाश्यमीश्वरादि चैतन्यं तदुपाधिभूतं समष्टिशरीरत्रयं वाऽहं नास्मि किन्तु सच्चिदानन्दाखण्डैकरस एवाहमस्मीति भावः, पाठान्तरे व्यतिरेकेणाहम्पदलक्ष्यकूटस्थस्य तत्पदलक्ष्यब्रह्मणश्चाभेदोऽनुसन्धातव्यः ॥ ४ ॥

इदानीं ज्ञानाज्ञानप्रपञ्चतल्लयसाक्षित्वेन सर्वदा स्वसच्चिद्रूपत्वानुसन्धानरूपं विदुषां प्रातःस्मरणमाह ।

ज्ञानाज्ञानप्रपञ्चेऽस्मिञ्ज्ञानाज्ञानेन नाशिते ।

यत्सच्छिष्टं परं ब्रह्म ह्यहं तन्नेतरत्स्मरेत् ॥ ५ ॥

ज्ञानेति । अस्मिंश्चैतन्यात्मनो मम प्रकाश्यत्वेन प्रत्यक्षे ज्ञानाज्ञानप्रपञ्चे ज्ञानं च साभासान्तःकरणवृत्तिरित्युक्तलक्षणमज्ञानं च ज्ञानविरोधिभावरूपमज्ञानमित्युक्तलक्षणं तयोः प्रपञ्चः ज्ञाताज्ञातरूपस्तस्मिञ्ज्ञानाज्ञानेन ज्ञानं च साभासान्तःकरणवृत्तिरूपं तेनाऽज्ञानं च चिदाभासव्यक्तिहीनं ज्ञानविरोधिभावरूपं तेन च समाहारे एकवद्भावो नाशिते नाशं प्रापिते सति ज्ञानाज्ञानयोः परस्परं विरोधाज्ज्ञानेन साज्ञानाज्ञातप्रपञ्चलयोऽज्ञानेन सज्ञानतत्प्रपञ्चलय इति विवेकस्तदा घटादिज्ञानाज्ञानभावाभावावस्थायां घटादिभावाभावावस्थायां दीप इव यदनिर्वचनीयं चित्स्वरूपं शिष्टमुर्वरितं तत्सत्कालत्रयाबाध्यमात्मचैतन्यं तदुक्तलक्षणमहमहङ्कारवृत्तिप्रतिबिम्बितचैतन्यरूपोऽहमस्मि अहङ्कारसाक्षिचैतन्यस्याहङ्कारप्रतिबिम्बितचैतन्यस्य च घटावच्छिन्नाकाशस्य तत्स्थजलप्रतिबिम्बिताकाशस्य चैक्यवच्चैक्यस्य पारमार्थिकत्वादिति भावः, अन्वयोक्तं व्यतिरेकेणापि दर्शयति हीति, अहमहंवृत्तिप्रतिबिम्बितश्चिदाभासस्तदुपाध्यहङ्कारासत्त्वेनाभासस्य च पृथगसत्त्वेन तत्सद्रूपं ब्रह्माभिन्नं कूटस्थचैतन्यमेवाऽस्मि भवामीतरत्कूटस्थचैतन्यादन्यत्किमपि न नास्ति सत्यं न भवतीत्यर्थः, इत्येवं स्मरेदऽनुसन्दध्याद् हि एतत्कूटस्थचैतन्यचिदाभासचैतन्ययोरैक्यं विद्वत्सु प्रसिद्धमिति ह्यर्थः ॥ ५ ॥

इति श्रीनरहरिशिष्यदि० मुनीन्द्रादिनच० प्रातःस्मरणनिर्णयार्थप्रकाशस्तृतीयः ॥ ३ ॥

अथ स्नानकालनिर्णयः ।

एवं मुनीन्द्राणां प्रातःस्मरणं निरूप्येदानीं तेषामेव स्ना-

नकालनिर्णयपूर्वकं स्नानविधिं निर्णेतुं द्विश्लोकं स्नानकालनिर्णयाख्यं प्रकरणमारभते, तत्र तावत्स्नानकाल एव स्नानकर्तव्यतावश्यतायां बौधायनस्मृतिमुदाहरति ।

अरुणकिरणग्रस्तां प्राचीमवलोक्य

स्नायादिति वचनात्स्नानम् ।

अरुणेति । अरुणकिरणग्रस्तामरुणस्य सूर्यसारथेः किरणाः करास्तैर्ग्रस्तां व्याप्तां प्राचीं पूर्वां दिशमवलोक्य प्रदर्श्य स्नायात्स्नानं कुर्यादित्येवं बौधायनवचनात्स्नानं कुर्यादिति शेषः ॥ १ ॥

तथा मुनीनां स्नानयोग्यमरुणोदयकालं निर्णेतुमाह ।

तथाहि ।

तथाहीति । तथा हि स एव स्नानकालः प्रदर्श्यत इत्यर्थः । तमेवाह ।

नश्यन्त्या मोहनिद्रायामन्धकारे गलत्यथ ।

आरोहति विचाराद्रिशिखरे ज्ञानभास्करे ॥ २ ॥

मोहनिद्रायामिति । लौकिकार्थे तावत्सर्वप्रपञ्चविस्मारकत्वात्स्वात्मविस्मारकमोह इव निद्रायां सुप्तौ नश्यन्त्यां नाशं प्राप्नुवत्यां सत्यां अथानन्तरमन्धकारे ध्वान्ते गलति नश्यति सति तथा ज्ञानभास्करे ज्ञानस्य रूपविशेषज्ञानकरणस्य चक्षुषः भास्करे प्रकाशके सूर्ये विचाराद्रिशिखरं विचारवद् दिङ्मोहनिवर्त्तकोऽद्रिः पूर्वाचलस्तस्य शिखरं शृङ्गमारोहति आरोहणं कुर्वति सति, प्रकृतेऽर्थे तु मोहनिद्रायां मोह एव स्वात्मविस्मारकत्वात्प्रपञ्चस्वप्नकारणत्वान्निद्रा सुप्तिस्तस्यां नश्यन्त्यां

नाशं प्राप्नुवत्यां सत्यामथानन्तरमन्धकारेऽन्धं स्वात्मदर्शनहीनं करोतीति अन्धकार आत्मदर्शनवृत्तिचक्षुर्हीनकर्तेत्यर्थः, तस्मिंस्तादृशेऽज्ञाने गलति नश्यति सति तथा ज्ञानभास्करे ज्ञानमेव सर्वप्रपञ्चप्रकाशकत्वाद्भास्करः सूर्य इव भास्करः सूर्यस्तस्मिन् विचाराद्रिशिखरं विचारो विवेक एवाद्रिरिवाभ्यासेन स्थिरीभूतत्वात्पर्वतो, यद्वा विचार आत्मानात्मविवेक एवात्तीति सर्वानात्मनाशकत्वादद्रिस्तस्य शिखरं पञ्चमषष्ठसप्तमभूमिकारूपं शृङ्गमारोहति आरोहणं कुर्वति सति, यद्वा विचाराख्यस्याद्रेरभ्यासेन स्थिरीभूताया द्वितीयभूमिकायाः शिखरमिव तृतीयचतुर्थभूमिकाख्यमिति व्याख्येयं ततः परं साक्षात्कारादिति भावः ॥ २ ॥

किञ्च ।

दिक्षु किंचित्प्रकाशासु दिङ्मोहे गलिते सति ।
संदेहकौशिके नष्टे जाते प्रागरुणोदये ॥ ३ ॥

इति श्रीनरहरिकृतौ बोधसारे मुनीन्द्रदिनचर्यायां स्नानकालनिर्णयश्चतुर्थः ॥ ४ ॥

दिक्ष्विति । लौकिकार्थस्तावद् दिक्षु पूर्वादिदिशासु किंचित्स्वल्पं यथा भवति तथा प्रकाशासु प्रकाशो विद्यते यासु तथा भूतासु सतीषु ततो दिङ्मोहे दिग्भ्रमे गलिते नष्टे सति ततः सन्देहकौशिके सन्देहः संशय इवामङ्गलरूपः कौशिक उलूकस्तस्मिन्नष्टे नाशं प्राप्ते सति गमनाशक्तनया क्वापि लीने सतीत्यर्थः, प्रागरुणोदये प्राग्सूर्योदयात्पूर्वमरुणस्य सूर्यसारथेरुदये उर्ध्वागमने जाते भवति सतीत्यर्थः । प्रकृते तु दिक्षु दिश्यते

ब्रह्माऽऽभिरिति ब्रह्मानुभवकारणभूता दिशो गुरूपदेशपूर्वकमहावाक्यजन्याऽहं ब्रह्मास्मीति प्रमारूपा वृत्तयस्तासु किञ्चित्प्रकाशासु किञ्चित्स्वल्पः प्रकाशोऽलौकिको ब्रह्मापारोक्ष्यरूपो यासु तासु पञ्चम्यारूढवृत्तिषु सतीष्वित्यर्थः, अत एव दिङ्मोहे दिश्यते ब्रह्माभिस्ता दिशः प्रमारूपा वृत्तयस्तासां मोह आत्मब्रह्मैक्यास्फूर्तिरूपस्तस्मिन्गलिते नष्टे सति, यद्वा दिक्षु अन्तःकरणवृत्तिषु किञ्चिद्ब्रह्मस्फुरणरूपासु सतीष्वित्यर्थः, दिङ्मोहे लौकिकं पूर्वादिदिग्ज्ञानं मोहकार्यत्वान्मोहो भ्रम एवेत्यर्थः, तस्मिन् गलिते नष्टे सति । उपासनापक्षे तु विवेकः पूर्वा दिगविवेकः पश्चिमा दिगुभयत्र चिदादित्योदयास्तप्रतीतेः कर्मज्ञानं दक्षिणा दिगुपासनाज्ञानमुत्तरा दिक्पितृलोकदेवलोकप्राप्तिसाधनत्वात् 'कर्मणा पितृलोको विद्यया देवलोक' इति श्रुतेः, एतज्ज्ञानेन लोकप्रसिद्धदिग्ज्ञानमेव दिग्भ्रमस्तस्मिन्नष्टे सतीत्यर्थः, ततः सन्देहकौशिके सन्देहः संशयोऽहं देहादिभ्यो भिन्नो वाऽभिन्नः, देहादिभिन्नोपि सविकारो वा निर्विकारः, निर्विकारोपि ब्रह्माभिन्नो वा भिन्न इत्यादिरूप स एव कौशिक इवान्धकारचारित्वादमङ्गलरूपत्वाच्चोलूकस्तस्मिन्नष्टे निवृत्ते सति । उपासनापक्षे तु तत्तदुपास्यज्ञानगतसंशय एवोलूकोऽमङ्गलरूपत्वात्ततः प्रागरुणोदये चित्सूर्योदयात्प्रागुपलक्षितकालेऽरुणोदयो यथा सूर्योदयोपलक्षकस्तद्वच्चित्सूर्योदयोपलक्षणभूतायां पञ्चम्यारूढबुद्धौ किञ्चित्साक्षात्कारप्रकाशोदये सति । उपासनापक्षेपि उपास्यविषये किञ्चित्प्रकाश आविर्भूते सतीति योज्यम् ॥ ३ ॥

इति श्रीन० मु० धर्मप्रकाशे ज्ञानकालनिर्णयार्थप्रकाशश्चतुर्थः ॥ ४ ॥

अथ स्नाननिर्णयः ।

एवं मुनीनां स्नानकालं निर्णीयेदानीं तेषामेव स्नानं निर्णेतुं स्नाननिर्णयाख्यमेकश्लोकं प्रकरणमारभते ।

अथ स्नाननिर्णयः ।

अथेति । अथ स्नानकालनिर्णयानन्तरं स्नाननिर्णयः स्नानस्यावगाहनस्य निर्णयो विचारः क्रियत इति शेषः, तमेवाह ।

ज्ञानगङ्गाहृदे शुद्धे मग्नो नखशिखावधि ।
यः स्नाति मूलमंत्रेण सर्वदैव स निर्मलः ॥ १ ॥

इति श्रीनरहरिकृतौ बोधसारे मुनीन्द्रदिनचर्यायां स्नाननिर्णयः पञ्चमः ॥ ५ ॥

ज्ञानेति । लौकिकपक्षे तावदुक्तलक्षणप्रसिद्धारुणोदयकाले गत्वेति शेषः, शुद्धे निर्मले ज्ञानगङ्गाहृदे ज्ञानमिव 'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते' इति स्मृतेः, ॐ अस्नाविरं शुद्धमपापविद्धमि'ति श्रुतौ च ज्ञानस्य शुद्धत्वमुक्तं द्रष्टव्यं, गङ्गायास्तु पापनिवर्तकत्वं प्रसिद्धमेव पुराणादौ स्वतः पवित्ररूपत्वात्पवित्रकारकत्वाच्च गङ्गा भागीरथ्यस्ति तस्या ह्रदोऽगाधजलोवयवस्तत्र नखशिखावधि नखानि अङ्घ्रिकरजानि शिखा च चूडा ते अवधी मर्यादे यस्यां क्रियायां भवतस्तत्तथाऽऽनखमाशिखमित्यर्थः, मग्नः सदेहं जले प्रविष्टः सन्यः कर्मविशेषज्ञानवान्कर्मकर्त्ता कश्चित्पुरुषो मूलमन्त्रेण मूलं स्मृतिपुराणादीनां श्रुतिस्तद्रूपमन्त्रेणाक्षरसमूहात्मकवाक्येन 'इमं मे गङ्गे'इत्यादिकेन गायत्रीरूपेण मन्त्रेण वा 'गङ्गागङ्गे'त्यादयः पुराणोक्ताश्च मन्त्रा ग्राह्यास्तैर्जातित्वादेकवचनं सर्वदैव सर्वकालमेव प्रतिदिनमित्यर्थः, स्नाति अवगाहते स पुरुषो निर्मलः शुद्धोस्तीति ज्ञातव्यः । प्रकृते तु यः पञ्चमभूम्याद्यारूढो मुनीन्द्रः शुद्धे ज्ञातृज्ञानज्ञेयाख्यत्रिपुटीरूपमलरहिते ज्ञानगङ्गाह्रदे ज्ञानं महावाक्यज-

न्यमहं ब्रह्मास्मीत्यपरोक्षं तदेव सर्वाविद्यादिमलनिवर्तकत्वाद्ग-ङ्गेव गङ्गा सन्ततप्रवृत्तं तस्या ह्रदोऽगाधजलः स इव निर्विकल्पाख्यः समाधिस्तस्मिन् नखशिखावधि न विद्यन्ते खानीन्द्रियाणि तज्जन्यज्ञानानि तद्विषयाश्च तेषामपीन्द्रियमात्रत्वात्खमात्रत्वं शिखा वक्ष्यमाणाऽथर्वशीर्षार्थज्ञानरूपा यस्मिन्कर्मणि तद्यथा भवति तथा मग्न आत्माकारतामापन्नः सन् मूलमन्त्रेणाऽहं ब्रह्मास्मि सोहमोङ्कारादिमन्त्रैर्जातित्वादेकवचनं सर्वजगत्कारणभूतब्रह्मतत्त्वप्रतिपादकत्वादेषां मूलमन्त्रत्वं तेन च तदर्थानुसन्धानपूर्वं स्वस्य ब्रह्मभावानुसन्धानेनेत्यर्थः, स्नाति अवगाहते तत्स्वात्मसुखमेवानुसन्धत्त इत्यर्थः, स ज्ञानी सर्वदैव सर्वकालमपि निर्मलोऽविद्यादिमलरहित एवास्तीति निश्चेतव्यम् । उपासना पक्षे तु यः कोप्युपासकः शुद्धे सिद्धिकामनारूपमलहीने ज्ञानगङ्गाह्रदे ज्ञानमत्र परोक्षमुपास्यब्रह्मविषयं तदेव सन्ततमुपास्यब्रह्मविषयसन्मुखप्रवाहवत्त्वेन गङ्गेव तस्या ह्रदोऽगाधजलवत्स्थिरीभूतत्वाद्ध्रद इव ध्यानरूपेण परिणतं तस्मिन् नखशिखावधि प्रत्यक्षनखशिखापर्यन्तं यथा भवति तथा मग्नो लीनः सन् स नखशिखदेहास्फुरणवाञ्जातः सन्नित्यर्थः, यद्वा न न विद्यन्ते खानीन्द्रियाणि शिखाश्चाथर्वशीर्षज्ञानरूपा यस्मिन्तन्नखशिखं तदवधिः सीमा यस्मिन्कर्मणि तद्यथा भवति तथा मग्नो लीनः सन्नित्यर्थः, मूलमन्त्रेण सोहमिति मन्त्रेण सर्वदैव नित्यमेव स्नाति अवगाहते ध्यानेन ध्येयाकारो भवतीत्यर्थः, स उपासको निर्मलः शुद्ध एव ज्ञेयः ॥ १ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थ प्रकाशे ज्ञाननिर्णयार्थप्रकाशः पञ्चमः ॥ ५ ॥

एवं मुनीन्द्राणां स्नानं निर्णीयेदानीं तेषामेव वस्त्रधारणनिर्णयपूर्वकं पूर्वाभिमुखस्थितिं निर्णेतुं वस्त्रधारणनिर्णयाख्यमेकश्लोकं प्रकरणमारभमाण आह ।

अथ वस्त्रधारणम् ।

अथेति अथ स्नानानन्तरं वस्त्रधारणं निर्णीयत इति शेषः । तदेवाह ।

अथ भक्तिप्रसादाख्ये परिधायांशुके मुनिः ।
यत्रोदयः सैव पुर्वा काष्ठा तस्याश्च सन्मुखः ॥ १ ॥

इति श्रीनरहरिकृतौ बोधसारे मुनीन्द्रादि० वस्त्रधारणनिर्णयः ॥ ६ ॥

अथेति। अथ स्नानानन्तरं मुनिर्मननशीलो मुनीन्द्र इत्यर्थः, भक्तिप्रसादाख्ये भक्तिः प्रेमलक्षणा वृत्तिः प्रसादो रागादिराहित्येन निर्मलत्वं ते आख्ये आह्वे ययोस्ते तथोक्ते ते यथा ज्ञानसाधने तथा कर्मसाधने इत्यर्थः, अंशुके वस्त्रे परिधाय परिधानं कृत्वा यत्र यस्यां दिशि उदयः सूर्याविर्भावो भवति सैव नान्या पूर्वा प्राची काष्ठा दिग् भवति तस्याश्च प्राच्याश्च सन्मुखोऽभिमुखो भवेत् । प्रकृते तु अथोक्तलक्षणस्नानानन्तरं मुनिर्मननवान् पञ्चम्याद्यारूढ इत्यर्थः, भक्तिः प्रेमलक्षणा जीवब्रह्मैक्यविषयान्तःकरणवृत्तिः प्रसादश्च रागादिमलनिवृत्तिपूर्वकद्वैतास्फुरणलक्षणा चित्तस्थिरता ते आख्ये आह्वे ययोस्ते अंशुके वस्त्रे परिधाय सन्धाय यत्र वृत्तावुदयश्चित्सूर्योदयश्चिन्मात्रस्वरूपात्माविर्भावो भवति सैव सा वृत्तिरेव पूर्वा प्रथमा काष्ठा स्थितिरवस्थेत्यर्थः, तस्याश्च स्थितेः सन्मुखोऽभिमुखो भवेदिति शेषः ॥ १ ॥

इति श्रीन० मुनी० वस्त्रधारणनिर्णयार्थप्रकाशः षष्ठः ॥ ६ ॥

अथ पवित्रादिधारणनिर्णयः।

एवं मुनीनां वस्त्रधारणनिर्णयं निरूप्येदानीं तेषामेव पवित्रादिधारणं निर्णेतुं पवित्रादिधारणनिर्णयाख्यं सार्धद्विश्लोकं प्रकरणं वक्तुमाह।

अथ पवित्रादिधारणनिर्णयः।

अथेति। अथ वस्त्रधारणनिर्णयानन्तरं पवित्रादिधारणं पवित्रमादि मुख्यं येषां तिलकादीनां ते पवित्रादयस्तेषां धारणमङ्गीकरणं तन्निर्णीयत इति शेषः। तत्रादौ कुशनिर्णयमाह।

पवित्राः सूक्ष्मशास्त्रार्थास्तीक्ष्णाग्रा हरिताश्च ये।
शातना कुत्सितस्यैते कुशा इति निरूपिताः॥ १॥

पवित्रा इति। तत्र तावल्लौकिकपक्षे पवित्राः शुद्धिकारणत्वात्स्वतः पूतास्तथा सूक्ष्मशास्त्रार्थाः शस्त्राण्येव शास्त्राणि स्वार्थेण सूक्ष्माणि सूक्ष्मधाराणि क्षुरादीनि तेषामर्थः प्रयोजनं येभ्यो जायते ते तथोक्ताः क्षुरादिभ्यश्छेदनमिव कुशेभ्योपि जायमानत्वादित्यर्थः, अत एव तीक्ष्णाग्रास्तीक्ष्णानि तीव्राणि अग्राणि येषां ते तथोक्ता हरिताश्च हरितवर्णाश्चैतादृशा ये प्रसिद्धा भवन्ति त एते कुत्सितस्य पापस्य विघ्नादिरूपस्यामङ्गलस्य शातनाश्छेदका यतो भवन्ति अतः कुशा इत्येवं नाम्ना निरूपिताः कथिताः। प्रकृते तु पवित्रा अज्ञानसंशयादिनिवृत्तिपूर्वकवेदान्ताविरोधेन निर्णीतत्वात्पूता इत्यर्थः, सूक्ष्मशास्त्रार्थाः सूक्ष्माणि सूक्ष्मार्थानि शास्त्राणि तेषां स्थूललौकिकदृग्गोचरत्वात्सूक्ष्मा ये शास्त्राणामर्था उपदेशकवाक्यानां निर्णीतार्थास्तेषां तात्पर्यरूपा इत्यर्थः, अत एव तीक्ष्णाग्रास्तीक्ष्णानि तीव्राणि अज्ञानभेदने समर्थानि अग्राणि तात्पर्यपर्यवसानानि येषां ते तथोक्तास्तथा हरिताश्च हरिता नवीनाः सदा बुद्धौ स्फुरिता इत्यर्थः, त एत उ-

त्फलक्षणाः कुत्सितस्य बन्धकत्त्वादशुभस्य संसारस्य शातना नाशका यतो भवन्ति अतस्ते शास्त्रार्था एव कुशा इत्येवं नाम्ना निरूपिताः कथिता ज्ञेया नान्ये लौकिकाः कुशा इत्यर्थः ॥ १ ॥

यदर्थं कुशनिर्णयः कृतस्तदाह ।

तत्पवित्रकरो भुत्वा मुनिः सव्येन वर्त्मना ।
वेदान्तसुत्रं यत्सूत्रं यस्याथर्वशिखा शिखा ॥ २ ॥

तदिति । तत्पवित्रकरस्तेषां कुशानां पवित्रे करयोर्हस्तयोर्यस्य स तथोक्तस्तथा विधो भूत्वा मुनिः कर्मज्ञानी सव्येन वर्त्मना वामस्कधतो दक्षिणकुक्षौ स्थितेन वेदान्तसूत्रं यथा ज्ञानसाधनं तद्वत्कर्मसाधनं सूत्रं यज्ञोपवीतं तत्सूत्रं धृत्वा तथा तद्वदथर्वशिखाऽथर्वशीर्षवच्छिखा शिखा चूडा कर्मठपक्षेयमर्थः । प्रकृते तु मुनिर्ज्ञानी पञ्चम्याद्यारूढ इत्यर्थः, तत्पवित्रकरस्तैश्चोक्तैः शास्त्रार्थरूपैः कुशैः पवित्रौ वेदान्तार्थाविरुद्धौ करौ साङ्ख्ययोगाख्यौ हस्तौ यस्य वेदान्तनिष्ठावतो ज्ञानिनः स तादृशो भूत्वा सव्येन वर्त्मनाऽद्वैततात्पर्यरूपेण शङ्करोक्तरीत्येर्थः, यत्प्रसिद्धं वेदान्तसूत्रं वेदान्ता उपनिषदस्तेषां सूत्राणि उपनिषदर्थसंग्राहकाणि व्यासप्रणीतानि शारीरकसूत्राणि जातावेकवचनं तदर्थं धारणमेव यज्ञोपवीतधारणमित्यर्थः, शिखामाह यस्येति, यस्य ज्ञानिनोऽथर्वशिखाऽथर्वशीर्षाणां मन्त्राणामर्थः शिखा चूडाऽस्ति ॥ २ ॥

तिलकनिर्णयमाह ।

जिज्ञासा दीर्घतिलको ब्रह्मकर्म समारभेत् ।

इति श्रीनरहरिकृतौ बोधसारे मुनीन्द्रदिनचर्यायां पवित्रादिधारणनिर्णयः ॥ ७ ॥

जिज्ञासेति। कर्मिपक्षे जिज्ञासा ज्ञानेच्छैव दीर्घस्तिलको यस्य स तथोक्तो ब्रह्मकर्म ब्रह्म वेदस्तदुक्तं कर्म संध्यादि कर्म समारभेत्कुर्याद्। ज्ञानिपक्षे जिज्ञासाऽऽत्मज्ञानेच्छैव दीर्घो लम्बायमानस्तिलको यस्य स तथोक्तो ब्रह्मकर्म 'ब्रह्मार्पणं ब्रह्म हविरि'ति स्मृत्युक्तं कर्म समारभेत्कुर्यादित्यर्थः ॥ ३ ॥

इति श्रीन० दि० बो० मुनीन्द्रदिन० पवित्रादिधारणनिर्णयार्थ-प्रकाशः सप्तमः ॥ ७ ॥

अथाचमननिर्णयः।

एवं पवित्रादिधारणं निर्णीयेदानी मुनीनामाचमनं वक्तुमाचमननिर्णयाख्यं प्रकरणमेकश्लोकमभिदधान आह।

अथाचमननिर्णयः।

अथेति। अथ पवित्रादिधारणनिर्णयानन्तरमाचमनं मुनीन्द्राणामाचमनमाचामो निर्णीयत इति शेषः। तदेवाह।

जडं करतले कृत्वा समुद्रमिव कुंभजः।
यदाचामति योगीन्द्रस्तदाचमनमुत्तमम् ॥ १ ॥

इति श्रीनरहरिकृतौ बोधसारे मुनीन्द्रदिनचर्यायामाचमन-निर्णयोऽष्टमः ॥ ८ ॥

जडमिति। योगीन्द्रो युज्यते संयोगं प्राप्यते कर्मफलेन स योगः कर्म स येषामस्तीति योगिनस्तेषामिन्द्रस्तेषु श्रेष्ठ इत्यर्थः, कर्मठो जडं डलयोरभेदाज्जलं करतले करस्य हस्तस्य तलमुपरिभागस्तस्मिन् कृत्वा सन्धार्य कुम्भजः कुम्भात्कलशाज्जातः कुंभजोऽगस्त्यः समुद्रं सागरमिव यत्प्रसिद्धमाचामति पिबति तत्तादृशमाचमनमाचाम उत्तमं श्रेष्ठमित्यर्थः। प्रकृतेर्थेतु योगीन्द्रो योगो जीवब्रह्मैक्यं तज्ज्ञानं च तद्येषामस्ति ते योगिनः प्रथमादिचतुर्थ्यन्तभू-

मिकासु आरूढास्तेषामिन्द्रस्तेषु श्रेष्ठ इत्यर्थः, पञ्चम्याद्यारूढो जातसाक्षात्कार इति भावः, जडं 'तदेतज्जडं मोहात्मकं मायामात्रमि'ति श्रुतेः, मायारूपं तत्कार्यं च करतले करोति आत्मानात्मविवेचनमिति करः सांख्यं स एव त्याज्यद्वैतत्यागसाधनत्वाद्धस्त इवेत्यर्थः, तस्य तलमिव तलं करोपरितनभागस्तद्वत्पुरुषोपि साङ्ख्यहस्तोपरितनभागत्वात्करतलं तस्मिन् कृत्वा तद्भोग्यत्वेन जगतः 'आत्मनस्तु कामाय सर्वं प्रियं भवती'ति श्रुतेः, स्वप्नपदार्थभोक्तरि स्वप्नपदार्थजातमिव तदभिन्नत्वेनालोक्येत्यर्थः, कुम्भजोऽगस्त्यः समुद्रं सागरमिव पुरुषमात्रावशेषं यथा भवति तथा यद्यादृशं मुनिप्रत्यक्षमाचामति पिबति तत्तादृशमाचमनमाचाम उत्तमं श्रेष्ठमित्यर्थः। जगत्करतले—इति पाठे कर्मठपक्षे गच्छति व्रजति पुनः पुनः स्वक्रियायामिति जगत्तल्लक्षणः करो हस्तस्तस्य तले जलमिसध्याहार्यं। ज्ञानिपक्षे तु 'अम्भो मरीचीर्मरमाप' इति श्रुतेः, जलकार्यत्वप्रतिपादनात्कार्यकारणयोरभेदाच्च जगदेव जलमन्यत्तु पूर्ववत् ॥ १ ॥

इति श्रीनरहरिशिष्यदिवा० बोध० मुनीन्द्रदि० आचमननिर्णयार्थप्रकाशोऽष्टमः ॥ ८॥

अथ प्रातःसन्ध्यानिर्णयः।

एवं मुनीनामाचमनं निरूप्येदानीं मुनीनां प्रातःसन्ध्यानिर्णेतुं प्रातःसंध्यानिर्णयाख्यं सार्धत्रिश्लोकं प्रकरणमाह।

अथ प्रातःसंध्यानिर्णयः ।

अथेति । अथाचमननिर्णयानन्तरं प्रातःसंध्यानिणयः प्रभाते या संध्या तस्य निर्णयो विचारः क्रियत इति शेषः। तमेव प्रतिजानीते।

अथोपयुक्तः क्रियते प्रातःसन्ध्याविनिर्णयः ।

मनोजन्म जगज्जन्म मनोनाशो जगल्लयः ॥ १ ॥

अथेत्यर्थेन। अथाचमननिर्णयानन्तरमुपयुक्तः प्रातःसन्ध्योपयोगी प्रातःसन्ध्याविनिर्णयो मुनीनां प्रातः प्रभाते या संध्या कर्म तस्या विनिर्णयो विचारः क्रियते निरूप्यत इत्युभयत्राप्येक एवार्थः, प्रतिज्ञातामेव मुनीनां प्रातःसंध्यां निर्णेतुं प्रातःसंधिमाह मन इति, कर्मठानां तु प्रातःसन्धिः स्पष्ट एवेति तमुपेक्ष्य मुनीनामेव तं निर्णीय दर्शयति मनोजन्मेति, मनसः संकल्पविकल्पात्मकान्तःकरणवृत्तेर्जन्माविर्भावः स एव तत्संकल्पितस्य जगतो जन्माविर्भावो मनःकल्पितस्य जगतो मनोमात्रत्वान्मनोजननमेव जगज्जननमिति भावः, अन्वयमुखेनोक्तं व्यतिरेकमुखेनाप्याह मनोनाशो मनसः संकल्पविकल्परूपांतःकरणवृत्तेर्नाशो लयः स एव जगल्लयो जगतो विश्वस्य लयो नाशः सुषुप्त्यादौ मनोलये सति सर्वप्रपंचलयदर्शनाज्जाग्रति च मनस उदयेनैव सर्वप्रपंचोदयदर्शनाच्चेति भाव ॥ १ ॥

तत्र हेतुमाह ।

तस्योन्मेषनिमेषाभ्यामुदयप्रलयौ यतः ।

समाध्यभ्यासशीलस्य पूर्वसंस्कारकारणात् ॥ २ ॥

तस्येति । यतो हेतोस्तस्य मनस उन्मेषनिमेषाभ्यामुन्मेषः संकल्परूपेणप्रपञ्चसन्मुखत्वं निमेषश्च संकल्पत्यागेन प्रपञ्चाविमुखत्वं ताभ्यां जगत उदयप्रलयावुदय उत्पत्तिः प्रलयो नाशस्तौ भवतोऽतो मनस आविर्भावे जगत आविर्भावस्तल्लये च तल्लय इति भावः। तत्र समाधिरूपप्रपञ्चलयस्य जाग्रदादिरूपप्रपञ्चोद्भवस्य च मनोलयमनोजन्मनोः संधिरेव संध्याकालो मुनीनामित्याह ।

समाधीति । समाध्यभ्यासशीलस्य मनोजन्ममनोलयसाक्षिचैतन्याकारपरिणामो मनसः समाधिस्तस्य योऽभ्यासः पुनः पुनस्तत्र वृत्तेः स्थिरीकरणं तदेव शीलं स्वभावो यस्य तस्य पुरुषस्य मनसो वा पूर्वसंस्कारकारणात्पूर्वं प्राग्यत्प्रपञ्चाकारवृत्तित्वं तस्य संस्कारो वासनारूपः स एव कारणं निमित्तं व्युत्थाने तस्माद्धेतोः ॥ २ ॥

यदुत्थानं समाधानात्स सन्धिः सन्धिरत्र हि ।
तत्रापि प्राप्ततत्त्वानां गुरूणामुपदेशतः ॥ ३ ॥

समाधानात्समाधितो यत्प्रसिद्धमुत्थानं प्रपञ्चे जागरणं जायते स प्रपञ्चलयस्य प्रपञ्चाविर्भावस्य च मनोलयस्य मनआविर्भावस्य च वा मध्यरूपो सन्धिः सम्यग्धीयते चिन्त्यते निरुपाधित्वेनात्मा यत्र स संधिशब्दवाच्यः कालोऽत्र मुनीन्द्रसंध्याकर्मणि विहितः कालः संधिः संधिनामको ज्ञेयः, हि प्रसिद्धश्चायं शास्त्र उक्तः, तथोक्तं ।

'निद्रादौ जागरस्यान्ते निद्रान्ते जागरोदये ।
लयो भवति चित्तस्य कार्यं तत्रात्मचिन्तनमिति' ॥ ३ ॥

एवं संधिमुक्त्वा संध्यामाह ।

खण्डितं नानुसन्धानं सा सन्ध्येत्युच्यते बुधैः॥४॥

इति श्रीनरहरिकृतौ बोधसारे मुनीन्द्रदिन० मुनीन्द्रप्रातःसन्ध्यानिर्णयो नवमः ॥ ९ ॥

तत्रापीति । गुरूणां महावाक्यार्थद्वारा स्वस्मिन्ब्रह्मत्वोपदेष्टॄणामुपदेशत उपदेशेन सार्वविभक्तिकस्तसिः, प्राप्ततत्त्वानां प्राप्तं लब्धं तत्त्वमनारोपितात्मस्वरूपं यैस्ते तथोक्तास्तेषां तत्रापि उत्थाने जातेपि ॥ ३ ॥

अनुसंधानं स्फुरणं स्वात्मस्फुरणमित्यर्थः, न खण्डितं न भग्नं यदि तर्हि सा स्वात्मानुसंधानरूपा संध्येति प्रपञ्चसाक्षिणः प्रपञ्चोद्भवस्य च सन्धिभवत्वात्स्वात्मानुसन्धानवृत्तेः सन्ध्यात्वमित्येवं बुधैर्विवेकिभिरुच्यते कथ्यते ॥ ४ ॥

इति श्रीन० मुनी० मुनीन्द्रप्रातःसन्ध्यानिर्णयार्थप्रकाशो नवमः ॥ ९ ॥

अथ प्राणायामनिर्णयः ।

एवं मुनीन्द्राणां सन्ध्यां निर्णीयेदानीं तेषामेव प्राणायामं निर्णेतुं प्राणायामनिर्णयाख्यं षोडशश्लोकं प्रकरणमारभमाण माह ।

अथ प्राणायामनिर्णयः ।

अथेति । अथ प्रातःसन्ध्यानिरूपणानन्तरं प्राणायामो मुनीन्द्राणां प्राणायामो निर्णीयत इति शेषः । तमेव निर्णयमाह ।

शरीराभ्यन्तरो वायुः प्राणापान इतीरितः ।
स एव गतिभेदेन संज्ञादशकमागतः ॥ १ ॥

शरीरेति । शरीराभ्यन्तरः शरीरस्य वपुषोऽभ्यन्तरः शरीरावच्छिन्नो वायुर्मारुतः प्राणापानः प्रकर्षेणानिति जीवयति देहेन्द्रियादिसंघातं स प्राणोऽपानिति निःसृत्य बहिः पारयति देहेन्द्रियादिसंघातं सोऽपान इत्येवं नाम्नेरितः कथितः, ननु शारीरस्य वायोर्दशविधत्वं तत्र तत्र शास्त्रेषु दृष्टं तत्कथमत्र द्वैविध्यमेवोच्यते तत्राह स एवेति, स एव प्राणापानाख्यः शारीरो वायुरेव गतिभेदेन गतिर्गमनं तस्या भेदेनोर्ध्वाध इत्यादिस्थानैश्चलनभिन्नत्वेन संज्ञादशकं संज्ञानां नाम्नां दशकं दशत्वमागतः प्राप्तः प्राणापानव्यानोदानसमाननागकू-

---

१ पारयतीति वा पाठः ।

मैकृकरदेवदत्तधनंजयाख्यां प्राप्त इत्यर्थः ॥ १ ॥

ननु तर्ह्यत्र द्वैविध्यमेव कुत उक्तं तत्राह ।

ऊर्ध्वाधोगतिमुख्यं द्विरूपं तस्य गतिद्वयम् ।
ऊर्ध्वं गच्छन्भवेत्प्राणस्त्वपानः स्यादधश्चलन् ॥ २ ॥

ऊर्ध्वाध इति । तस्य शारीरस्य वायोरूर्ध्वं चाधश्चोर्ध्वाध ऊर्ध्वाधश्च ते गती च गमने ते मुख्ये प्रधाने यस्य तत्तथोक्तं गतिद्वयं गत्योर्गमनयोर्द्वयं युग्मं द्विरूपं द्वयो रूपयोः समाहारो द्विरूपमस्तीति शेषः, ननु कया गत्या किं नाम तस्येत्यत आहोर्ध्वमिति, ऊर्ध्वमुपरि गच्छश्चलन् सन् स शारीरो वायुः प्राणः प्राणनामा भवेदुपरितनभागे नासाग्रसमवर्तिषोडशान्तस्थाने चलन्प्राणो भवेदित्यर्थः, तथा स एव शारीरो वायुरधः षोडशान्तादधो हृदयकमलान्तं चलन्गच्छन्सन्नपानोऽपाननामा स्याद्भवेत् ॥ २ ॥

ननु प्राणरूपेणापानरूपेण वा शरीर एव कुतस्तिष्ठति बहिः कुतो न गच्छति तत्राह ।

अपानः कर्षति प्राणं प्राणोऽपानं च कर्षति ।
अनयोः शृङ्खला देहे तेन जीवो न निश्चलः ॥ ३ ॥

अपान इति । अपानोऽधोगत्युपलक्षितः शारीरो वायुविशेषः प्राणमूर्ध्वगमनशीलं शारीरं वायुं कर्षति आकर्षति ततः प्राणः प्राणनामा वायुरपानमपाननामानं वायुं चापि कर्षति आकर्षति, नन्वधऊर्ध्वगतिमतोर्वाय्वोः परस्परमाकर्षणं परस्परकृतं कथं सम्भवतीत्याशङ्क्याहानयोरिति, अनयो प्राणापानयोर्देहे शरीरे शृङ्खला शृङ्खलेव परस्परं बन्धनं ग्रन्थिरि-

त्यर्थः, अस्तीति शेषः; तयोः परस्परं शृङ्खलासत्त्वे चिन्हमाह ते- नेति, तेन प्राणापानशृङ्खलासत्त्वेन जीवो जीवोपाधिश्चित्तं न- निश्चलो न स्थिरो भवति अतः प्राणापानयोर्बन्धनमस्तीति निश्चेतव्यमिति भावः, अतः प्राणापानावरोधं विना चित्तस्थैर्यं न स्यादिति भावः ॥ ३ ॥

तत्रापि मतभेदमाह।

चले वाते चलं चित्तं निश्चले निश्चलं भवेत्।
चित्ते चले चलः प्राणो निश्चले निश्चलो भवेत्॥४॥

चल इति। वाते प्राणवायौ चले चञ्चले सति चित्तमन्तः- करणं जीवोपाधिभूतं चलं चञ्चलं भवेत्स्यात्तस्मिन्नेव प्राणवायौ निश्चले स्थिरे सति चित्तमन्तःकरणं निश्चलं स्थिरं भवेत्स्यादिति केषांचिन्मतं। तथा केषांचिन्मते चल इति, चित्ते जीवोपा- धिभूतेऽन्तःकरणे चले संकल्पविकल्परूपेण चलायमाने सति प्राणः शरीरावच्छिन्नो वायुश्चलश्चञ्चलो भवेत्स्यात्तस्मिन्नेव जीवोपाधिभूतेऽन्तःकरणे निश्चले संकल्पविकल्पत्यागेन स्थिरी- भूते सति स एव शारीरो वायुर्निश्चलः स्थिरो भवेत्स्यादित्येवं केषांचिन्मतं ज्ञेयम् ॥ ४ ॥

मतभेदमेव किंचित्स्पष्टीकुर्वन्नाह।

कश्चित्प्राणजयेनैव मनोनिश्चलतां भजेत्।
कश्चिन्मनोजयेनैव प्राणनिश्चलतां भजेत् ॥ ५ ॥

कश्चिदिति। कश्चित्कोपि हठयोगीत्यर्थः, प्राणजयेनैव प्राणः शरीराभ्यन्तरो वायुस्तस्य जयः स्थैर्येण स्वाधीनीकरणं तेनैव केवलं मनोनिश्चलतां मनसोन्तःकरणस्य निश्चलतां स्थैर्यं भजेत्प्रा- प्नुयात्तथाऽन्यः सांख्यः पातञ्जलश्चेत्यर्थः, मनोजयेनैव मनसो

ऽन्तःकरणस्य जयः स्थैर्यसम्पादनं तेनैव केवलं प्राणनिश्चलतां प्राणस्य शरीरावच्छिन्नस्य वायोर्निश्चलतां स्थिरत्वं भजेत्प्राप्नुयात् ॥ ५ ॥

अन्यदपि मतमाह ।

कश्चिद्द्वयजयेनैव मनोनिश्चलतां भजेत् ।
इति योगगतिज्ञानां त्रिविधा योगिनां गतिः ॥६॥

कश्चिदिति । कश्चित्कोपि मुनिर्मननवान्वेदान्तीत्यर्थः, द्वयजयेनैव द्वयं मनःप्राणयोर्द्वयं युग्मं तस्य जयः स्वाधीनीकरणं स्थैर्यसम्पादनमित्यर्थः, तेनैव निश्चलतां स्वात्मनि स्थैर्यं भजेत्प्राप्नुयाद्, उक्तं मतभेदमुपसंहृत्य निगमयतीतीति, इत्येवं प्रकारा योगगतिज्ञानां योगस्य जीवब्रह्मैक्यज्ञानस्य गतिः प्राप्तिस्तां जानन्ति विदन्ति ते तथोक्तास्तेषां योगिनां योगवतां गतिर्गमनं योगप्रापकं साधनमित्यर्थः, त्रिविधा त्रिप्रकाराऽस्तीति शेषः, अन्तःकरणशुद्धिद्वारा जीवब्रह्मैक्यकारणं त्रिप्रकारं ज्ञेयमिति भावः ॥ ६ ॥

नन्वेतानि केषां मतानीति ज्ञानापेक्षायामाह ।

प्राणद्वारा मनः साध्यं मतं हि हठयोगिनाम् ।
मनसैव मनः साध्यमिति विज्ञानयोगिनाम् ॥७॥

प्राणद्वारेति । प्राणद्वारा प्राणावरोधनद्वारभूतेन प्राणायामादिरूपेण हठेन मनः स्वान्तं साध्यं स्थिरत्वेन स्वाधीनं कार्यं हि एतद् हठयोगिनां हठयोगवतां मतं निश्चितमस्तीति शेषः, तथा मनसैव विवेकरूपेण मनोंशेनैव केवलं मनः संकल्पविकल्परूपो मनोंशः साध्यं संकल्पविकल्पलयेन स्थिरं कार्यमिति एवं रूपं मतं निश्चितं विज्ञानयोगिनां पातञ्जलसांख्यादीनामस्ति । तत्र

केवलविवेकेनैव मनःस्थैर्यं न भवति किन्तु प्राणावरोधेनैव योगिष्वेव तत्स्थैर्यस्य दृश्यमानत्वादिति हठमतं, केवलप्राणायामादिना कृतेपि प्राणावरोधे मनोमौढ्यावशेषाद्बीजरूपेण मनोवशिष्टमिति सुप्तिमूर्छादिष्विव न मनोलयरूपः पुरुषार्थः सिद्ध्यतीति विवेकेनैव केवलं मन्तव्यमिथ्यात्वप्रतीतौ दृढतरायां सत्यां मनसः शैथिल्येन क्रमाल्लयरूपः पुरुषार्थः सिद्ध्येदिति ज्ञानिनां मतमिति विवेकः ॥ ७ ॥

वेदान्तमतमाह ।

मनःप्राणद्वययुजस्ते तु श्रेष्ठतराः स्मृताः ।
चेच्छुष्कहठिनो मूढास्ते भण्डा न तु योगिनः॥८॥

मनःप्राणेति । ये तूक्तोभयविलक्षणा इति तुपदार्थः, तदेव वैलक्षण्यमाह मन इति, मनश्चान्तःकरणं प्राणश्च शारीरो वायुस्तयोर्द्वयं युग्मं तद्युञ्जन्ति लीनं स्वात्मनि कुर्वन्तीति ते तथोक्तास्ते श्रेष्ठतरा अतिश्रेष्ठा इत्यर्थः, स्मृता उक्ता मुनिभिरिति शेषः, विनैव गुरुदीक्षां स्वबुद्ध्या हठे प्रवृत्तान्निन्दति चेदिति, मूढा हठक्रियाज्ञानशून्या गुरुशिक्षारहिता इत्यर्थः, अत एव शुष्कहठिनो निष्फलहठाभ्यासरताश्चेद्यदि भवन्ति तर्हि ते शुष्कहठाभ्यासिनो भण्डा हठक्रियाविनोदिन एव ज्ञेयाः, तु पुनस्ते योगिनो हठयोगाभ्यासिनो न न भवन्ति हठमिषेण ते लोकवञ्चका ज्ञेया इति भावः ॥ ८ ॥

इदानीं सिद्ध्यनादरेण मुक्तावादरं विधातुं सिद्धिकामेन हठेप्रवृत्तानां क्षुद्रत्वं दर्शयति ।

ते त्वर्धयोगिनः प्रोक्ताः क्षुद्रसिद्ध्यर्थयोगिनः ।
पिङ्गलेडा सुषुम्णा च मुख्यास्तिस्रस्तु नाडिषु॥९॥

ते त्विति । ये तु तुपदेन गुरुशिक्षया हठाभ्यासिषु पूर्वेभ्यः श्रैष्ठ्यं सूचितं, क्षुद्रसिद्ध्यर्थयोगिनः क्षुद्रास्तुच्छाः परकायप्रवेशाकाशगमनादिका मोक्षविघ्नभूता याः सिद्धयस्ता एवार्थः प्रयोजनं तस्मै तत्प्राप्तुं योगिनो योगाभ्यासिनो भवन्ति तेऽर्थयोगिनोऽलौकिकसिद्धिकारणयोगवत्त्वाद्योगिनोऽपि प्रधानफलभूतमोक्षाभावात्तेषां क्षुद्रत्वाच्चार्थयोगिनः प्रोक्ताः कथिता मुमुक्षुभिस्तत्रादरो न कर्तव्य इति भावः, अत्र पतञ्जलिरप्याह 'ते समाधावुपसर्गा व्युत्थाने सिद्धय' इति । अस्यार्थः, याः सिद्धयोऽन्तर्धानादयस्ते समाधौ मुक्तावुपसर्गा विघ्नभूता भवन्ति, ननु समाधावन्तकरणलये सति कथं सिद्ध्यनुभवस्तत्राह व्युत्थान इति, समाधितो व्युत्थानेन प्रपंचोद्भवे सति य एव सिद्धयः सिद्धिशब्दवाच्योर्थ इत्यर्थः, स एव विघ्नभूतो ज्ञेय इति, अतः सिद्ध्यादरं परित्यज्य मुक्तिहेतुकं योगमभ्यसितुं योगाङ्गभूतं प्राणायामं निरूपयिष्यन्तदुपोद्घातत्वेन नाडीभेदमाह पिंगलेति, नाडिषु द्वासप्ततिसहस्रसंख्यासु देहान्तर्वर्तिनीषु नाडिषु मध्ये मुख्याः प्रधानास्तिस्रस्तु त्रिसंख्याका नाड्यो भवन्ति तदधीनत्वात्सर्वासामिति भावः, तुपदेन द्वासप्ततिसहस्रनाडीभ्यस्तिस्रोऽतिविलक्षणा इति सूचितं, ता एव नामतो निर्दिशति पिङ्गलेति, पिङ्गला पिङ्गलानाम्न्येकेडेडानाम्नी द्वितीया सुषुम्णा च सुषुम्णानाम्न्यपि तृतीया भवति ॥ ९ ॥

स्थानतोपि ता निर्दिशति ।

इडा वामा पिङ्गलान्या सुषुम्णा मध्यवर्तिनी ।
वामदक्षिणमार्गेण सदा वहति मारुतः ॥ १० ॥

इडेति । वामा वामभागे प्रवर्तमानेडेडानाम्नी ज्ञेया, अन्या दक्षिणा दक्षिणभागे प्रवर्तमाना नाडी पिङ्गला पिङ्गला-

नाम्नी भवति, तथा मध्यवर्तिनी मध्ये प्रवर्तमाना नाडी सुषुम्णा सुषुम्णानाम्नी ज्ञेया, यदर्थं नाडीभेद उक्तस्तमाह वामेति, मारुतः शारीरो वायुर्वामदक्षिणमार्गेण वामः सव्यो दक्षिणोऽपसव्यो मार्गो नाडीच्छिद्रं तेनेडापिङ्गलानाडीभ्यामित्यर्थः, सदा नित्यं वहति चलति ॥ १० ॥

तर्हि सुषुम्णायां कदा चलतीत्यत आह।

यदा द्वावपि रुध्येते प्राणमार्गौ सुयोगिना।

तदान्यत्सर्पवत्प्राणो रन्ध्रमाविशति स्वयम् ॥ ११॥

यदेति। सुयोगिना सम्यग्योगाभ्यासवता पुरुषेण द्वावपीडापिङ्गलानामानावुभावपि प्राणमार्गौ प्राणस्य शरीरावच्छिन्नस्य वायोर्मार्गौ पन्थानौ रुध्येते रुद्धौ भवतो यदा यस्मिन्काले तदा तस्मिन्काले प्राणः शारीरो वायुः सर्पवद्यथा सर्पः सर्वेषु च्छिद्रेषु रुद्धेषु सत्सु तदन्यत्सूक्ष्ममपि च्छिद्रं प्रविशति तद्वदन्यदिडापिङ्गलाभ्यां भिन्नं रन्ध्रं छिद्रं तृतीयं सुषुम्णाख्यं स्वयं स्वत एवाविशति प्रविशति, इडापिङ्गलारोधनमेवापेक्षितं न तु ततोन्यः सुषुम्णायां वायोः प्रवेशने प्रयत्नोऽपेक्षित इति भावः ॥ ११ ॥

सुषुम्णाप्रवेशनक्रममेवाह।

स्थिता कुण्डलिनी मूले जीवशक्तिरनुत्तमा।

तामुत्थाप्य तया सार्धं सुषुम्णां प्राण आविशेत् ॥ १२॥

स्थितेति। मूले मूलाधाराख्यचक्रे गुदस्थान इत्यर्थः, अनुत्तमा न विद्यत उत्तमा श्रेष्ठा यस्याः सा तथाभूताऽतिश्रेष्ठेत्यर्थः, जीवशक्तिर्जीवस्य साधिष्ठानबुद्धिस्थचिदाभासस्येत्यर्थः, शक्तिः सामर्थ्यरूपा कुण्डलिनी कुण्डलिनीनाम्नी

जाग्रदादिमोक्षपर्यन्तजीवसंसारजनयित्रीत्यर्थः, स्थिता वर्तमाना-ऽस्तीति शेषः, अस्तु किं तत इत्यत आह तामिति, प्राणः शारीरो वायुः प्राणायामाभ्यासेनावरुद्धस्तां कुण्डलिनी-मुत्थाप्यान्तर्मुखीं कृत्वा जीवस्य यत्पारमार्थिकं शिवस्वरूपं तदभिमुखीं कृत्वेत्यर्थः, तया जीवशक्त्या सार्धं सह सुषु-म्णां ब्रह्मनाडीमाविशेत्प्रवेशं कुर्यादेवं प्राणस्य सुषुम्णा-प्रवेशक्रमो ज्ञेयः ॥ १२ ॥

ततः किमित्यत आह ।

सुषुम्णावाहिनि प्राणे ब्रह्मरन्ध्रं गते सति ।
तत्र निश्चलतां याते मनो निश्चलतां व्रजेत् ॥ १३ ॥

सुषुम्णेति । प्राणे प्राणवायौ सुषुम्णावाहिनि सुषुम्णा ब्रह्मनाडी तस्यां वाहिनि प्रवेशवति सति ततस्तया नाड्या ब्र-ह्मरन्ध्रं भ्रमरगुहानामकं स्थानं प्रति गते प्राप्ते सति ततश्च तत्र ब्रह्मरन्ध्रे निश्चलतां स्थिरतां याते प्राप्ते सति ततो मनः सङ्क-ल्पविकल्पात्मकं जीवोपाधिभूतमन्तःकरणं निश्चलतां स्थैर्यं व्रजेत्प्राप्नुयात् ॥ १३ ॥

एवं हठक्रमेण मनोलयप्रकारमुक्त्वेदानीं ज्ञानक्रमेणापि तमाह ।

मनो यदि निरुध्येत केवलं ज्ञानयोगिना ।
प्राणापानौ नश्यतस्तु मनोनाशेन तत्क्षणात् ॥ १४ ॥

मन इति । ज्ञानयोगिना ज्ञानयोगाभ्यासवता केवलं प्रा-णोपाधितो विविक्तं सद्यदि यर्हि विवेकेन मनः सङ्कल्पवि-कल्पात्मकमन्तःकरणं सङ्कल्पविकल्परूपांशं संत्याज्य निरुध्येता-वरुन्ध्यात्तर्हि तदा मनोनाशेन सङ्कल्पविकल्पांशमनसो नाशेन लयेन तत्क्षणात्सद्य एव प्राणापानौ प्राणापाननामानौ वायू

नश्यतो नष्टौ भवतो निद्रामूर्च्छादौ मनोलये सति प्राणापानप्रवाहस्य विद्यमानत्वेपि बाधादर्शनादिति मनोलयेनैव तयोर्नाश इति भावः ॥ १४ ॥

एवमुभयमतं निरूप्येदानीं मुमुक्षुग्राह्यं वेदान्तमतमाह ।

तस्मात्सिद्धान्त एवैको हठविज्ञानयोगिनोः ।
शास्त्रोक्तमिति विज्ञाय निर्णयं प्राणचेतसोः ॥ १५ ॥

तस्मादिति । हठविज्ञानयोगिनोर्हठयोगज्ञानयोगाभ्यासवतोस्तस्मान्मनोलयस्यैवोभयत्र साध्यत्वाद्धेतोः सिद्धान्तो निश्चय एक एव सम एव भवतीत्येवं शास्त्रोक्तं वेदान्तशास्त्रोक्तं प्राणचेतसोः शरीरावच्छिन्नस्य वायोर्मनसश्च निर्णयं सिद्धान्तं विज्ञाय ज्ञात्वा ॥ १५ ॥

प्राणायामं मुनिः कुर्यान्मनोलयसमन्वितम् ॥ १६ ॥

इतिश्रीन० बो० मुनीन्द्र० प्राणायामनिर्णयो दशमः ॥ १० ॥

मुनिर्मननवान् सन् विवेकपूर्वकमित्यर्थः, प्राणायामं प्राणानां शारीरवायूनामायाममवरोधनं मनोलयसमन्वितं मनमः सङ्कल्पविकल्पात्मकवृत्तेर्लयो नाशस्तेन समन्वितं सहितं यथा भवति तथा कुर्यात्क्रियतामित्यर्थः, केवलप्राणायामेन प्राणस्थैर्येपि विवेकाभावेन बीजनाशाभावान्मनोनाशाभावः केवलविवेकेन मनोनिरोधे प्राणायामाभावात्पुनः पुनस्तदुदयान्मनोनाशाभाव इति मनोमलनिवृत्त्यै प्राणायामोपेक्षितस्ततो विवेकेनोत्पन्नेन मनोलयो भवतीति निश्चयोयं मुमुक्षुभिर्ग्राह्य इति भावः ॥ १६ ॥

इति श्रीनरहरिशिष्यदिवाक० बो० मुनीन्द्रदिनचर्यार्थप्रकाशे प्राणायामनिर्णयार्थप्रकाशो दशमः ॥ १० ॥

अथार्घदाननिर्णयः।

एवं प्राणायामनिर्णयमभिधायेदानीं मुनीनामर्घदानं निर्णेतुमर्घदाननिर्णयाख्यं प्रकरणं त्रिश्लोकमारभमाण आह।

अथार्घदानम्।

पूर्णाञ्जलिमयास्त्र्यर्घा भावनागाङ्गवारिणा।
सर्वपापविशुद्ध्यर्थं प्रदेयाः कर्मसाक्षिणे ॥ १ ॥

अथेति। अथ प्राणायामनिर्णयानन्तरमर्घदानमर्घाणां दानं समर्पणं निर्णीयत इति शेषः, तत्र लौकिकार्घदाने तु प्रसिद्धजलपूर्णेनाञ्जलिना प्रसिद्धेनैव तयोर्घा दीयन्ते। ज्ञान्यर्घदाने तु जलं किमञ्जलिश्च कः प्रयोजनं च किं कस्मै देयश्च तत्सर्वमाह पूर्णेति, मुनिना पूर्णाञ्जलिमयाः पूर्णं ब्रह्म तदेव जलस्थानीयं रसरूपत्वाद् 'रसो वै स' इति श्रुतेः, अञ्जलिश्चोभयकरसंहतिरूपः प्रसिद्धो लोके, अत्र तु वक्ष्यमाणसाङ्ख्ययोगाख्यकरयोरविरोधज्ञानरूपोऽञ्जलिः पूर्णस्य ब्रह्मणोऽञ्जलिः साङ्ख्ययोगयोरविरोधबोधरूपस्तन्मयास्तत्प्रचुराः 'एकं साङ्ख्यं च योगं च यः पश्यति स पश्यती'तिभगवदुक्तत्वात्, सङ्ख्यामाह त्र्यर्घा इति, त्रिसङ्ख्याका अर्घाः, जलमाह भावनेति, भावनागाङ्गवारिणा साङ्ख्ययोगयोरविरोधस्य भावना चिन्तनं तदेव गाङ्गं वारि गङ्गाजलं तेन, फलमाह सर्वेति, सर्वपापविशुद्ध्यर्थं सर्वं सर्वपदवाच्यं द्वैतमेव पापं दुःखकारणत्वात्तस्य विशुद्धिः 'सर्वं खल्विदं ब्रह्मे'ति श्रुत्यर्थबोधेन सर्वपदवाच्यद्वैतबाधनाद्ब्रह्मत्वप्रतीतिरूपा तदर्थं तादृशप्रयोजनाय देवतामाह प्रदेया इति, कर्मसाक्षिणे लोके तावत्सूर्यायार्घो दीयते, एते त्वर्घाः कर्मसाक्षिणे कर्मणः क्रियायाः साक्षिणे साक्षात्प्रकाशकाय चिदादि-

स्याय प्रदेयाः समर्घ्याः ॥ १ ॥

प्रतिज्ञातमर्घत्रित्वं स्पष्टयति सार्धेन ।

इदं दृश्यमहंद्रष्टा प्रथमोर्घो मनीषिणाम्

ब्रह्म सत्यं जगन्मिथ्या द्वितीयोर्घस्ततः परः ॥ २ ॥

इदमिति । इदमहङ्कारादिदेहान्तं त्वम्पदलक्ष्यकूटस्थचैतन्यभास्यं तथा देहादिमायान्तं सर्वं तत्पदलक्ष्यब्रह्मचैतन्यभास्यं तयोर्ब्रह्मचैतन्यकूटस्थचैतन्ययोर्घटाकाशमहाकाशयोरिव वास्तवाभेदात्तत्सर्वं ब्रह्माभिन्नकूटस्थस्य मम दृश्यं प्रकाश्यमस्ति अहं ब्रह्माभिन्नः कूटस्थोऽहं तस्य सर्वस्य दृश्यजातस्य द्रष्टा भासकोऽस्मीत्येवं बोधो मनीषिणां विवेकिनां प्रथम आद्योऽर्घो ज्ञेयः, द्वितीयं दर्शयति ब्रह्मेति, ब्रह्मदेशकालवस्तुकृतपरिच्छेदशून्यं वस्तु भूमशब्दवाच्यं सत्यं कालत्रयेप्यबाधितत्वात्परमार्थरूपमस्ति जगच्चञ्चलस्वभावं मायातत्कार्यं चान्योन्यस्मिन्व्यावृत्तत्वान्मिथ्याऽसत्यमित्येवं बोधस्ततः प्रथमादर्घात्परोऽन्यो द्वितीय इत्यर्थः, अर्घोऽर्घ्यमस्तीति ज्ञेयः ॥ २ ॥

एवं द्वितीयमर्घं निरूप्येदानीं तृतीयमर्घं निरूपयति ।

नेदमस्त्यहमेवास्मि तृतीयोर्घः परात्परः ।

एवं त्रिधार्घदानेन चिदादित्यः प्रसीदति ॥ ३ ॥

इति श्रीनरह० बो० मुनीन्द्रदिनचर्यायामर्घदाननिर्णयः ॥ ११ ॥

नेदमिति । इदं सर्वं दृश्यजातं नास्ति नैव विद्यते किं तु अहमेव ब्रह्माभिन्नः कूटस्थचैतन्यरूपस्त्वम्पदलक्ष्य एव केवलमस्मि भवामि 'नेहनानास्ति किञ्च न'ति श्रुतेर्द्वैतजातस्य बाधितत्वादिति भावः, इत्येवं बोधः परादृद्वितीयात्परोऽन्यस्तृतीयोर्घोऽर्घ्यं ज्ञेयं, फलमाहैवमिति, एवं त्रिधार्घदानेनैवं-

विधानामुक्तलक्षणानामर्घाणामर्घ्याणां दानेनात्मनः पृथगसत्त्वनिश्चयरूपसमर्पणेन चिदादित्यश्चैत्यरहितश्चित्मात्र आत्मैवादित्यः सूर्यः सर्वजगत्प्रकाशकत्वात्प्रसीदति निर्मलः सन्स्वयं प्रकाशते ॥ ३ ॥

इति श्रीनरहरिशिष्य द्वि० बोधसारार्थदीपे मुनीन्द्रदिनत्रयार्धप्रकाशेऽर्घदाननिर्णयार्थप्रकाश एकादशः ॥ ११ ॥

अथ गायत्रीजपनिर्णयः ।

एवं मुनीन्द्राणामर्घदानं निर्णीयेदानीं तेषामेव गायत्रीजपं निर्णेतुं गायत्रीजपनिर्णयाख्यं चतुःश्लोकं प्रकरणं वक्तुकाम आह ।

अथ गायत्रीजपनिर्णयः ।

अथेति । अथार्घदाननिर्णयानन्तरं गायत्रीजपो मुनीन्द्राणां गायत्र्या गायत्रीमन्त्रस्य जपो निर्णीयत इति शेषः । तमेवाह ।

अखण्डमण्डलाकारं देवं ज्योतिर्मयं स्मरन् ।
उपदेशात्सदाऽऽवृत्तिरिति वेदान्तसूत्रतः ॥ १ ॥

तिष्ठेज्जपेच्च गायत्रीमष्टोत्तरशतत्रयम् ।
गायन्तं त्रायते यस्माद्गायत्री तेन सा स्मृता ॥ २ ॥

अखण्डेति । मुनिरखण्डमण्डलाकारमखण्डमेकरसं मण्डलं बिम्बमाकार आकृतिर्यस्य स तथोक्तस्तं देवं ज्योतिर्मयं चिन्मात्रस्वरूपं देवं स्वप्रकाशमात्मानं स्मरन्ननुसन्दधानः सन् तिष्ठेदासीत, अत्र प्रमाणमाहोपदेशादिति, 'उपदेशात्सदावृत्तिरि'ति वेदान्तसूत्रत उपदेशादुपदेशाद्वारभ्य सदा नित्यमावृत्तिरावर्तनमुपदिष्टार्थस्य जीवब्रह्मैक्यरूपस्यानुसन्धानपूर्वक-

मुपदेशकृद्वाक्यजातस्य पुनः पुनः श्रवणाद्यावर्त्तनमित्यर्थः, कर्त्तव्येति शेषः, इत्येवं वेदान्तसूत्रप्रामाण्याद्वेतो गायत्रीं च जपाख्यां जपेदावर्तयेद्, जपसंख्यामाहाष्टोत्तरशतत्रयमष्टावष्टौ चोत्तराणि अधिकानि येषु शतेषु तेषां त्रयं त्रिकं यथा तथा जपश्चतुर्विंशत्यधिकानि त्रिशतानीत्यर्थः, उपलक्षणमेतत् षट् शताधिकैकविंशतिसहस्रसङ्ख्याया अजपायाः, नित्यं गायत्रीजपस्य चतुर्विंशत्यधिकत्रिशतसंख्याकस्य नित्यकर्मत्वेन पापनिवृत्तिफलकत्वाद्, अजपाया अपि षट्शताधिकैकविंशतिसहस्राया अपि आत्मानुसन्धायकत्वेनान्तःकरणशोधकत्वात्सर्वद्वैतरूपपापनिवृत्त्या सर्वदुःखनिवर्तकत्वाद् नित्यकर्मत्वाच्च चतुर्विंशत्यधिकत्रिशतसंख्यगायत्रीजपस्य षट्शताधिकैकविंशतिसहस्रजपस्य च साम्यत्वमात्मानुसन्धायकत्वेनाजपाया एव जाप्यत्वं मुनीन्द्राणां, ननु अजपाया गायत्रीत्वं कुत इत्यत आह गायन्तमिति, गायन्तमात्मानुसन्धानपूर्वकं स्वमुच्चरन्तं यस्माद्यतः कारणात्त्रायते रक्षति साऽजपा तेन कारणेन गायत्री गायत्रीनाम्नी स्मृतोक्ता मुनिभिरिति शेषः ॥ १ ॥

ननु गायत्र्यर्थस्याजपार्थस्य च भिन्नत्वात्कथमजपाया गायत्रीत्वमित्याशङ्क्य गायत्र्यर्थमजपायां सम्भावयितुं गायत्र्यर्थं तावदाह ।

अन्तर्यामिस्वरूपेण सर्वधीवृत्तिनोदकम् ।
सवितृमण्डले ध्येयं गायत्र्यर्थपरं महः ॥ २ ॥

अन्तर्यामीति । अन्तर्यामिस्वरूपेण'यः पृथिव्यां तिष्ठन्' इत्यादि यः सर्वेषु तिष्ठन्सर्वान्यमयती'श्रुत्या सर्वान्तर्याम्युक्तः स स्वरूपं यस्य तत्तथोक्तं तेन कृत्वा सर्वधीवृत्तिनोदकं सर्वपदवाच्यं यद्द्वैतजातं तदाकारा या धीवृतयो बुद्धिवृत्तयस्तासां नोदकं प्रे-

रकं गायत्र्यर्थपरं 'तत्सवितुरि'ति प्रसिद्धगायत्रीमन्त्रार्थतात्पर्यभूतं महत्तेजः सर्वप्रकाशकं चिन्मात्रमित्यर्थः, सवितृमण्डले सवितुर्मायातत्कार्यप्रसवितुः शबलाख्यस्य जगत्कारणभूतस्य ब्रह्मणो मण्डले बिम्बभूते चिन्मात्रे ततः पृथगसत्त्वाद्बिम्बभूतमेव तद्ध्येयं चिन्तनीयम्। अजपायामपि तदहंशब्दवाच्यस्य तच्छब्दवाच्यस्य च परोक्षप्रत्यक्षादिविरुद्धांशत्यागेन भागलक्षणया लक्षितं जीवब्रह्मैक्यं लक्षयन्त्यां गायत्र्यर्थवत्त्वेन गायत्रीत्वं संभाव्यमिति भावः ॥ ३ ॥

ननु त्र्यक्षराया अजपाया गायत्रीत्वे लोकप्रसिद्धगायत्र्यां चतुर्विंशत्यक्षरपाठगौरवं किमर्थमित्याशङ्क्याह।

चतुर्विंशत्यक्षरया गायत्र्या ब्रह्मविद्यया।
चतुर्विंशतितत्त्वानां लयकृद्ब्राह्मणः शुचिः ॥ ४ ॥

इति श्रीनरहरिकृतौ बोधसारे मुनीन्द्रदिनचर्यायां गायत्रीजपनिर्णयो द्वादशः ॥ १२ ॥

चतुर्विंशतीति। चतुर्विंशत्यक्षरया चतुर्विंशतिसंख्यान्यक्षराणि वर्णा यस्यां सा तथोक्ता तया ब्रह्मविद्यया ब्रह्मोपासनाङ्गमन्त्ररूपया, यद्वा ब्रह्मज्ञानार्थत्वाद्ब्रह्मविद्यात्वं गायत्र्यास्तथा चतुर्विंशतितत्त्वानामष्टौ प्रकृतयः षोडशविकाराश्चेत्येवं चतुर्विंशतिसंख्यानां सांख्योक्ततत्त्वानां लयकृन्नाशकृत्प्रकृतितत्कार्यलये कृते सति पुरुषस्यासङ्गसच्चिदानन्दब्रह्मलक्षणवत्त्वज्ञानेन स्वस्यापि ब्रह्माभिन्नत्वज्ञाने सति ब्राह्मणो ब्रह्मविद्भवति अत एव स शुचिर्निर्मलो जायत इति शेषः, इदमेव प्रयोजनं चतुर्विंशत्यक्षरप्रयोगे ज्ञेयम् ॥ ४ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशो गायत्रीजपनिर्णयार्थप्रकाशो द्वादशः ॥ १२ ॥

अथोपस्थाननिर्णयः ।

एवं गायत्रीजपनिर्णयं निरूप्येदानीं मुनीन्द्राणामुपस्थानं निर्णीय प्रदर्शयितुमुपस्थाननिर्णयाख्यं द्विश्लोकं प्रकरणं कथयन्नाह ।

अथोपस्थाननिर्णयः ।

अथेति अथ गायत्रीजपनिर्णयनिरूपणानन्तरमुपस्थाननिर्णयः क्रियत इति शेषः, तमेव निरूपयितुं हस्तौ निर्णीय दर्शयति ।

मुनिः प्रसार्य सरलौ प्रलम्बौ सपवित्रकौ
सांख्ययोगौ निजौ बाहू उपतिष्ठेत भास्करम् ॥ १ ॥

मुनिरिति । लोके तावत्प्रसिद्धावेव करौ प्रसिद्धकुशपवित्रसहितावुपरि लम्बायमानौ कृत्वा प्रसिद्धसूर्यसन्मुखं स्थित्वा 'मित्रो जनान्यातयती'त्यादि मन्त्रैरुपस्थानं क्रियते । अत्र तु हस्तादिविशेषसहितमुपस्थानविशेषमाह मुनिर्मननशीलो ज्ञानीत्यर्थः, सरलौ प्रकृतितत्कार्यसत्त्वजीवानेकत्वेश्वरताटस्थ्यरूपविरोधत्यागेन वेदान्तानुकूलौ प्रलम्बौ जीवब्रह्मैक्यबोधपर्यन्तौ सपवित्रकावुक्तसर्वसूक्ष्मशास्त्रार्थरूपकुशपवित्रसहितौ सांख्ययोगौ सांख्यशास्त्रयोगशास्त्राख्यौ निजावात्मीयौ बाहू हस्तावनात्मत्यागस्यात्मग्रहणस्य च साधनत्वात्प्रसार्य वेदान्तादरेण तयोरादरशैथिल्येन शिथिलौ कृत्वेत्यर्थः, भास्करं भा जगत्प्रकाशस्तस्य करं कर्त्तारं 'तस्य भासा सर्वमिदं विभाती'तिश्रुतेश्चिदात्मानमित्यर्थः, उप समीपे पारमार्थिकात्मस्वरूपेण व्यावहारिकचिदाभासस्य बाधितत्वदृष्ट्या व्यवहारनिर्वाहकत्वात्समीपवर्तित्वमिति ज्ञेयं, तिष्ठेत स्थितिं कुर्यात् ॥ १ ॥

मन्त्रमाह ।

नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चिनारायणशङ्करात्मने ॥ २ ॥

इति श्रीनरहरिकृतौ बोधसारे मुनीन्द्रादिनचर्यायामुपस्थाननिर्णयस्त्रयोदशः ॥ १३ ॥

नम इति । सवित्रे मायायास्तत्कार्यस्य च जनकायेति तटस्थलक्षणलक्षितायेत्यर्थः, स्वरूपलक्षणेन लक्षयति जगदिति, जगदेकचक्षुषे जगतो द्वैतजातस्यैकं मुख्यं चक्षुर्दर्शनसाधनभूतं चक्षुरिव चक्षुश्चिन्मात्रं तस्मै जगत्प्रकाशकायेत्यर्थः, पुनस्तटस्थलक्षणेन लक्षयति जगदिति, जगत्प्रसूतिस्थितिनाशहेतवे जगतो द्वैतजातस्य प्रसूतिरुत्पत्तिः स्थितिः स्थानं नाशो लयस्तेषां हेतुः कारणं तस्मै यं विना जगदुत्पत्तिस्थितिलया न भवन्तीत्यर्थः, पूर्वत्र मायातत्कार्ययोरधिष्ठानत्वेन कारणत्वमत्र तूपादानकारणत्वमिति विवेकः, अत एव त्रिगुणात्मधारिणे त्रयो गुणाः सत्त्वरजस्तमोभिधास्तानात्मनि धारयतीति तच्छीलायाऽत एव विरिञ्चिनारायणशङ्करात्मने विरञ्चिर्ब्रह्मा नारायणो विष्णुः शङ्करो रुद्रस्तेषामात्मनेऽन्तर्यामिरूपिणे, यद्वा विरञ्चिर्ब्रह्मा नारायणो विष्णुः शङ्करो रुद्रस्त्रयाणां गुणानां रजःसत्त्वतमसामभिमानिनस्त एवात्मानो देहा यस्य तथा विधायेत्यर्थः, अत एव त्रयीमयाय त्रयी वेदत्रयी तन्मयाय तद्योनित्वेन सर्वज्ञत्वादिलक्षणलक्षिताय, यद्वा त्रयी वेदत्रयी तन्मयाय वेदत्रयप्रतिपाद्यायेत्यर्थः, तथाहि सूत्रं 'शास्त्रयोनित्वादि'ति ॥ २ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसा० मुनीन्द्रदिनच-
र्यार्थप्रकाश उपस्थाननिर्णयार्थप्रकाशस्त्रयोदशः ॥१३॥

अथ सहोमाङ्गहोमनिर्णयः।

एवमुपस्थाननिर्णयं निरूप्येदानीं होमाङ्गसहितं होमं निर्णेतुं सहोमाङ्गहोमनिर्णयाख्यं सार्धचतुर्दशश्लोकं प्रकरणमारभमाण आह।

अथ सहोमाङ्गहोमनिर्णयः।

एवं समाप्य विधिना प्रातः संध्याविधिं मुनि।
होमस्यावसरं ज्ञात्वा यज्ञशालां ततो विशेत् ॥ १ ॥

अथेति। अथोपस्थाननिर्णयानन्तरं सहोमाङ्गहोमनिर्णयो होमस्य हवनस्याङ्गानि यज्ञशालाप्रायश्चित्तादीनि तैः सहितस्य होमस्य हवनस्य निर्णयः सिद्धान्तः क्रियत इति शेषः, तत्रादावितिकृत्समाहैवमिति, एवमुक्तप्रकारेण विधिना विधानेन प्रातःसन्ध्याविधिं प्रातःकालीना या सन्ध्योक्तलक्षणा सन्ध्याख्या क्रिया तस्या विधिमनुष्ठानं समाप्य समाप्तं कृत्वा मुनिर्मननवान् होमस्य वक्ष्यमाणलक्षणहोमस्यावसरं समयं यत्र कालेऽहन्ताममते बाधकत्वेन स्फुरतस्तं कालमित्यर्थः, ज्ञात्वाऽवगत्य ततोऽनन्तरं यज्ञशालामिज्यते पूज्यत आत्मानेनेति यज्ञः समाधिस्तस्य शाला स्थानं वक्ष्यमाणमाविशेत्प्रविशेत्। लौकिकपक्षे तु मुनिः कर्मकाण्डविवेकवानेवमनेन प्रकारेण विधिना विधानेन प्रातःसन्ध्याविधिं प्रातःकालीना या सन्ध्या सन्धिभवा क्रिया तस्या विधिमनुष्ठानं समाप्य समाप्तं कृत्वा ततः सन्ध्याकर्मानन्तरं होमस्य गार्हपत्यहोमस्यावसरं समयं सूर्योदय-

कालमित्यर्थः, ज्ञात्वाऽवलोक्य यज्ञशालां यज्ञस्य यजनस्य शालां गृहं विशेत्प्रविशेत् । प्रकृते तु यज्ञशाला वक्ष्यमाणा ज्ञेया ॥ १ ॥

लोके तावत्प्रसिद्धा यज्ञशालाऽत्र तु विशिष्टां तामेवाहार्धेन ।

यज्ञशाला भूमिका स्यात्तृतीया तनुमानसा ।
सव्यार्हान्सव्यतः कुर्यादसव्यार्हानसव्यतः ।
संचरेत तथा नैव प्रायश्चित्तीयते यथा ॥ २ ॥

यज्ञशालेति । तृतीया भूमिका भूमिस्तनुमानसा तनुमानसा तनुमानसानाम्नी तनवः सूक्ष्मा मानसा मनोधर्माः सङ्कल्पविकल्परागद्वेषेच्छाकामादयो यत्रेति तन्नाम्नीत्यर्थः, यज्ञशाला ज्ञानियज्ञस्य शाला विशिष्टं गृहं स्याद्भवेत्तां प्रविशेदिति पूर्वत्रान्वयः, ततः किंकुर्यादित्यत आह सव्यार्हानिति । लोके तावदयमर्थः, सव्यार्हान्सव्ये वामाङ्गेऽर्हान्योग्यान्पदार्थान्होमसामग्रीभूतान्सव्यतः सव्ये वामभागे कुर्यात्स्थापयेत्तथाऽसव्यार्हानसव्येऽपसव्ये दक्षिणभाग इत्यर्थः, अर्हान्योग्यान्पदार्थान्होमसामग्रीभूतानसव्यतोऽसव्येऽपसव्ये दक्षिणभाग इत्यर्थः, उभयत्र सप्तम्यन्तात्तसिः, यथा येन प्रकारेण प्रायश्चित्तीयते प्रायश्चित्ती भवति तथा तेन प्रकारेण नैव सञ्चरेत नैव वर्तेतेत्यर्थः। प्रकृते तु सव्यार्हानऽद्वैतं मोक्षसाधनत्वात्सव्यं तत्रार्हान्योग्यान्विवेकादीन् सव्यतोऽद्वैतात्मस्वरूपप्राप्तिसाधनत्वादात्मनः पृथक्सत्त्वरहितत्वाच्चाद्वैत आत्मनि कुर्यात्स्थापयेदद्वैतात्मवत्तानपीष्टत्वेनाङ्गीकुर्यादिति भावः, तथाऽसव्यार्हानसव्येऽपसव्यत्वात्पितृलोकप्राप्तिकारणत्वेन कर्मनिर्वाहकं द्वैतं तत्रार्हान्योग्यान्यज्ञादिधर्मान्साधनैः सहितानसव्यतोऽपसव्ये द्वैतरूपसंसारे कुर्यात्तत्कारणत्वेन विभाव्य तत्रोपेक्षां कुर्यादित्यर्थः,

एवं साधनानि द्वैताद्वैतोपयोगेन विविच्य यथा येन प्रकारेण प्रायो बहुशश्चित्तीयते चित्तं द्वैतकार्यसाधनरतमन्तःकरणं तस्याचरणमिवाचरणं क्रियते यथा तथा तेन प्रकारेण नैव सञ्चरेत संप्रवर्तेत केवलाद्वितीयात्मप्राप्तिसाधनेषु विवेकादिष्वेव प्रवर्तेतेति भावः॥ २॥

तथापि पूर्ववासनया कदाचिच्चित्तस्य चित्तधर्मेषु प्रवृत्तौ सत्यां तन्निवर्त्तकचित्तधर्माङ्गीकाररूपं प्रायश्चित्तं विधत्ते।

अथ कर्मातिपातः स्याद्दुर्गत्वाद्ब्रह्मकर्मणः।
प्रायश्चित्तविधिं ज्ञात्वा तच्च सद्यः समाचरेत्॥३॥

अथेति। अथऽथापि चित्तधर्मेषु चेतः प्रवृत्तौ रुद्धायामपीत्यर्थः, ब्रह्मकर्मणो ब्रह्मस्वरूपभूतकर्मणः समाधिरूपस्येत्यर्थः, दुर्गत्वाद्दुःसाध्यत्वात्कर्मातिपातः कर्मणो ब्रह्मस्वरूपभूतस्य कर्मणः समाधेरित्यर्थः, अतिपातो नाशः प्रपञ्चव्युत्थानरूप इत्यर्थः, स्याद्भवेत्तदा प्रायश्चित्तविधिं प्रायो बहुशश्चित्तविधिं चित्तनाशविधिं वक्ष्यमाणं ज्ञात्वाऽवलोक्य निश्चित्येत्यर्थः, तच्च तदपि चित्तधर्मनिवर्त्तकचित्तधर्मविशेषाङ्गीकरणरूपं प्रायश्चित्तमित्यर्थः, सद्यस्तत्कालमेव नोपेक्षया विलम्बः कर्त्तव्य इति भावः, समाचरेत्कुर्वीत। लौकिकार्थस्तावदथाथापि सावधानतया प्रवृत्तौ सत्यामपीत्यर्थः, ब्रह्मकर्मणो ब्रह्म वेदस्तदुक्तस्य कर्मणो दुर्गत्वाद्दुःसाध्यत्वात्कर्मातिपातः कर्मणः क्रियाया अतिपातो विघातः स्याद्भवेत्तदा प्रायश्चित्तविधिं प्रायश्चित्तानां कर्मातिपातजन्यदोषनिवर्तककर्मणां विधिं प्रकारं ज्ञात्वा निश्चित्य तच्च प्रायश्चित्तमपि सद्यस्तत्कालं समाचरेत कुर्वीत नतूपेक्षां कुर्यादिति भावः॥ ३॥

सद्यः प्रायश्चित्तकर्तव्यतायां बोधायनस्मृतिमुदाहरति।

'कर्मातिपाते प्रायश्चितं

तत्कालमि'ति वचनात्प्रायश्चित्तानि ॥ ४५ ॥

कर्मेति । कर्मातिपाते कर्मणो विघाते सति प्रायश्चित्तं कर्मातिपातजन्यदोषनिवर्तककर्मरूपं तत्कालं तदानीमेव कर्तव्यमितिशेषः, इति वचनादित्येवं बौधायनवाक्याद्धेतोः ॥ ४ ॥

लौकिकप्रायश्चित्तविलक्षणानि मुनीनां प्रायश्चित्तानि वक्तुमाह ।

अथ प्रायश्चित्तानि ।

अथेति । अथ प्रायश्चित्तकर्तव्यतायां प्रमाणनिरूपणानन्तरं प्रायश्चित्तानि मुनीनां कर्मातिपातजन्यदोषनिवर्त्तकानि चित्तधर्माङ्गीकरणरूपाणि उच्यन्त इति शेषः, तान्येवाह ।

क्षमयैव जयेत्क्रोधं सत्येनैवानृतं जयेत् ।

अश्रद्धां श्रद्धया जित्वा दानैः कृपणतां जयेत् ॥५॥

क्षमयेति । क्षमयैव क्षान्त्यैव केवलं नान्येनोपायेन क्रोधं कोपं जयेन्नाशयेत्तथाऽश्रद्धां गुरुवेदान्तवाक्येष्वश्रद्धारूपं कर्मातिपातजं दोषं श्रद्धया गुरुवेदान्तवाक्येषु विश्वासेनैव जयेन्नाशयेत्तथा दानैरुदारचित्ततया सत्पात्रसमर्पितैरर्थैः कृत्वा कृपणतामनुदारतारूपं समाधिरूपब्रह्मकर्मातिपातजं दोषं जयेन्नाशयेत् ॥ ५ ॥

अत्रोक्तेर्थे प्रमाणतां साधयत्यर्धेन ।

इतीमे सेतुसामोक्ताश्चत्वारः सेतवो दृढाः ।

उपलक्षणमेवैतदन्यानपि तथा जयेत् ॥ ६ ॥

इतीति । इत्येवमिमे एते चत्वारश्चतुःसंख्या दृढा बालिष्ठाः

सेतवो मार्गाः सेतुसामोक्ताः सेतवो मार्गास्तत्प्रतिपादकं साम 'सेतूंस्तरेदि'त्यादिगीतिरूपं तस्मिन्नुक्ताः कथिता ज्ञेयाः, अत एतदप्रामाणिकं न मन्तव्यमिति भावः, नन्वेते किञ्चत्वार एव नेत्याहोपलक्षणमिति, एतच्चतुःसेतुनिरूपणमुपलक्षणमुपलक्षकमन्येषामपि एव निश्चेतव्यं तथा तथासति उपलक्षणत्वे सतीत्यर्थः, अन्यानपि कर्मातिपातजान्दोषाञ्जयेन्निवारयेत् ॥ ६ ॥

तानेव दर्शयति ।

उत्थानेन जयेन्निद्रां कामं सङ्कल्पवर्जनात् ।
सन्तोषेण जयेल्लोभं मोहं बोधदृशा जयेत् ॥ ७ ॥

उत्थानेनेति । उत्थानेनोत्थानं निद्रानिवृत्त्यै स्थानान्तरगमनादिकं तेन निद्रां सुषुप्तिं जयेन्नाशयेत्तथा सङ्कल्पवर्जनात्सङ्कल्पस्य गुणबुद्ध्या चिन्तनरूपस्य वर्जनं त्यागस्तस्मात्कामं मनसोभिलाषरूपां वृत्तिं जयेन्नाशयेत्तथा लोभं लोभरूपां वृत्तिं सन्तोषेण सन्तोषोऽलंबुद्धिस्तया जयेन्नाशयेत्तथा बोधदृशा बोधो ज्ञानं सैव दृग्दृष्टिः स्वात्मस्मृतिरित्यर्थः, तया मोहमात्मसाक्षात्कारसाधनानवधानरूपं स्वात्मविस्मृतिरूपं वा जयेन्नाशयेत् ॥ ७ ॥

मदमत्सरमुख्यांश्च सर्वभूतात्मभावनात् ।
अन्यानपि जयेद्दोषान्नित्यानित्यविचारणात् ॥ ८ ॥

मदेति । मदमत्सरमुख्यांश्च मदः सर्वगुणैः स्वस्मिन्नाधिक्यबुद्धिर्मत्सरः परोत्कर्षासहनं तौ मुख्यौ येषां कामादीनां ते तथोक्तास्तानपि सर्वभूतात्मभावनात्सर्वाणि समस्तानि यानि भूतानि पृथिव्यादीनि तत्कार्याणि च तेषु आत्मनोऽस्तिभातिप्रियरूपेण स्वस्य भावनं नाम चिन्तनं नामरूपासत्त्वप्र-

तीतिपूर्वकं सच्चिदानन्दरूपेण चिन्तनं ततस्तेनेत्यर्थः, जयेन्ना-शयत्तथाऽन्यानपि उक्तदोषेभ्योतिरिक्तानपि दोषान्स्वसा-क्षात्कारविघ्नरूपान्नित्यानित्यविचारणान्नित्यमात्मरूपं सच्चिदा-नन्दरूपेण सर्वत्र नामरूपात्मकेषु स्थितमनित्यं चानात्म-रूपमसज्जडरूपं दुःखरूपं च माया तत्कार्यं चानयोर्विचार-णाद्विविच्य दर्शनाज्जयेन्नाशयेदात्मानात्मविचारणादिति पा-ठेपि स एवार्थः ॥ ८ ॥

लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः ।

सकषायं विजानीयात्समप्राप्तं न चालयेत् ॥ ९ ॥

लय इति । लये सुषुप्तौ लीने सति चित्तं मनः प्रबोधये-द्योगेन समाधौ निरुध्यमानं चेतो विषयेभ्यो व्यावृत्तमपि ल-याभिमुखं चेत्तदानीमुत्थापनप्रयत्नेन, यद्वा लयकारणनिरासेन तत्सम्यगुत्थापयेद्, लयकारणानि पातञ्जल उक्तानि 'लयहेतवो निद्राशेषोऽजीर्णबह्वशनश्रमा' इति । अस्यार्थः, लयस्य लयाभि-मुखस्य चेतसो लयसन्मुखत्वे हेतवः कारणानि निद्राशेषो नि-द्राया अपूर्णतैकः, अजीर्णं भक्षितान्नस्योदरे परिपाकाभावो द्वितीयो, बह्वशनं स्वाहारादधिकान्नभक्षणं तृतीयः, श्रमश्च च-तुर्थ इत्येवंरूपाश्चत्वारो हेतवो भवन्ति तन्निवारणेन जाग्र-दभिमुखं कृत्वा ततः समाधौ निरुन्ध्यादिति भावः । ततो लया-दुत्थापितं चित्तं यदि विक्षिप्तं स्यान्नित्यं जाग्रद्विषयमतीत्य-भ्यासवशात्कामभोगेषु विक्षिप्तं विक्षेपं प्राप्तं भवेच्चञ्चलं भ-वेदित्यर्थः, तर्हि पुनर्भूयोपि शमयेद्विवेकिप्रत्यक्षभोग्यवस्तुस्थि-तसर्वप्रकारदुःखानुसन्धानेन शास्त्रार्थानुसन्धानेन जन्मादि-विकाररहिताद्वितीयात्मानुसन्धानेन वा भोग्यावस्तुत्वनिश्चयेन

वा शमयेन्निर्वासनं कुर्यात्ततश्च तच्चित्तं सकषायं कषायस्तीव्रचित्तदोषस्तीव्ररागद्वेषादिवासना तया ग्रस्तं यदि भवेत्तर्हि तद्विजानीयात्कदाचित्समाधिस्थितमिव लयविक्षेपशून्यं दुःखैकाग्रमवतिष्ठते तादृशं चित्तं विजानीयात्समाहितचित्ताद्विविच्य जानीयादित्यर्थः, असमाहितमिदमिति निश्चित्य कषायप्रतीकारं कुर्यादिति भावः, तथा समप्राप्तं समं ब्रह्म 'समं सर्वेषुभूतेष्वि'त्यादिस्मृतेः, तत्प्राप्तं तदाकारं यदि भवेत्तर्हि तच्चित्तं कषायलयग्रस्तत्वभ्रमेण ततो न चलितं कुर्यात्समे ब्रह्मणि चित्ते स्थापिते सति तत्रैव स्थिरं तत्कुर्यादिति भावः ॥ ९ ॥

ततोपि किं कार्यमित्यत आह ।

नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत् ।
विशेदेकाग्रया बुद्ध्या सिद्धिमेवमवाप्नुयात् ॥ १० ॥

नेति । तत्र समे ब्रह्मणि चेतसि स्थापिते सति परमानन्दाविर्भावः स्यात्तत्र तस्मिन्परमानन्दाविर्भावे सति रसमानन्दं नास्वादयेन्नानुभूयाद् 'रसो वै स' इति श्रुतेः, ।

ननु 'सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियमि'ति स्मृतेः ।
समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत् ।
न शक्यते वर्णयितुं तदा गिरा स्वयं तदन्तःकरणे न गृह्यते ॥
इति श्रुतेश्च, समाधावाविर्भूतस्य ब्रह्मानन्दस्य श्रुतिस्मृतिभ्यां बुद्धिग्राह्यत्वमुक्तं भवता तु तद्विरुद्धं बुद्ध्यग्राह्यत्वं कथमुच्यत इति चेन्नायं दोषः समाधिविरोधिव्युत्थानकारणभूतवृत्तिविषयकसुखास्वादनिषेधाद्, यथा ग्रीष्मदिनेषु मध्याह्ने जाह्नव्यादिनदीजलनिमग्नेनाप्यनुभूयमानं शैत्यसुखं तदा वक्तुमशक्यं पश्चात्ततो निःसृतेनोच्यते, यथा वा

सुषुप्तावविद्यावृत्तिभिरतिसूक्ष्माभिरनुभूयमानमपि स्वरूपसुखं तदानीं सविकल्पेनान्तःकरणेन गृहीतुमशक्यमपि प्रबोधकाले तु स्पष्टं तत्परामृशति, तथा समाधौ वृत्तिरहितेन संस्कारमात्रशेषतया सूक्ष्मेण चित्तेन सुखानुभवः श्रुतिस्मृतिविवक्षितः, अस्माभिस्तु महदिदं समाधिसुखमन्वभूवमिति व्युत्थितस्य स्मृतिविषयः सविकल्पो रसास्वादशब्देनानन्दोऽभिहितः स च प्रतिषिध्यतेऽतो न विरोधः। एतदभिप्रायं विशदयितुमाह निःसङ्ग इति, प्रज्ञया प्रकृष्टं सविकल्पकं ज्ञानं प्रज्ञा तया निःसङ्गः सङ्गः सम्बन्धस्तद्रहितो भवेत्स्याद्, यद्वा धृतिगृहीता बुद्धिः प्रज्ञा तया निःसङ्गः समाधिसुखनिरूपणाद्यासक्तिरहितो भवेत्स्यादित्यर्थः, यद्वा प्रज्ञया समाधिरूपवृत्त्या निःसङ्गस्त्वास्त्विकसम्बन्धहीनः शुद्धचिन्मात्रो भवेदित्यर्थः, एतदभिप्रायेणाप्याह विशेदिति, एकाग्र्यैकं स्वगतादिभेदरहितमग्रं पर्यवसानं यस्याः सा तथोक्ता स्वलयेन ब्रह्ममात्ररूपपर्येत्यर्थः, बुद्ध्या निश्चयात्मिकान्तःकरणवृत्त्या विशेल्लीनो भवेद्ब्रह्माकारो भवेदित्यर्थः, ततः किं तत्राह सिद्धिमिति, एवं प्रकारेण सिद्धिं मुक्तिमवाप्नुयात्प्राप्नुयान्नान्यथोक्तलक्षणब्रह्मकर्मफलसिद्धिरिति भावः ॥ १० ॥

एवं होमविघातकानि प्रायश्चित्तानि निरूप्येदानीं होमाङ्गेतिकर्तव्यतामाह।

उद्धृते गार्हपत्याग्नौ तत्तत्संस्कारसंस्कृते।
सत्यरूपः स्वयं यज्वा श्रद्धा पत्नी पतिव्रता॥ ११ ॥

उद्धृत इति। गार्हपत्याग्नौ वक्ष्यमाणे गार्हपत्यनामन्यग्नावुद्धृते वक्ष्यमाणलक्षणेनोद्धरणेनोद्धृते बहिर्निष्कासिते सति तत्तत्संस्कारसंस्कृते ते ते तच्छुद्धिकारणभूताः संस्कारा जीवस्य ये विवेकिप्रसिद्धाः शान्त्यादयस्तैः संस्कृते शोधिते सति

जीवरूपेऽग्नौ सत्यरूपस्त्वंपदलक्ष्यः शुद्धजीवः स्वयमात्मा यज्वा होमकर्त्ता भवति पतिव्रता पत्युरात्मनो व्रतं स्वसुखचित्सन्मात्रस्थितिरूपं व्रतं यस्याः सा तथोक्ता श्रद्धा गुरुवेदान्तवाक्येषु विश्वासरूपा वृत्तिः सा पत्नी यज्वपत्नी भवति ॥ ११ ॥

लोके तावद्गार्हपत्योऽग्निः प्रसिद्ध एवात्र तु गार्हपत्यशब्दनिरुक्त्या तं विशिष्टं लक्षयति ।

गृहं देहः पतिर्जीवश्छादितो मोहभस्मना ।
जीवस्य गार्हपत्याग्नेस्तदुद्धरणमुत्तमम् ॥ १२ ॥

गृहमिति । देहः शरीरं गृहं गृह्यत आत्मभ्रान्त्याङ्गीक्रियत इति गृहं मन्दिरं जीवो जीवयति शरीरमिति जीवः, यद्वा जीवति प्राणान्धरतीति जीवः पतिः पाति रक्षतीति पतिः शरीरस्य जीवकत्वात्प्राणधारकत्वाच्चास्ति स मोहभस्मना मोहोऽज्ञानं जीवाग्न्याच्छादकत्वाद्भस्मेव भस्म तेनाच्छादित आवृतो भवति तत्तो मोहभस्मतो जीवस्य जीवरूपस्य गार्हपत्याग्नेः शरीरगृहपालकस्य तत्प्रकाशत्वाच्चाग्नेः । यद्वा तत्त्वज्ञानेन शरीरगृहदाहकत्वेनाग्नेस्तस्य च सत्त्वसमर्पणेन पालकस्य चोद्धरमुद्धार उत्तमं श्रेष्ठमतिश्रेष्ठमित्यर्थः, नान्यल्लौकिकमग्न्युद्धरणं श्रेष्ठमिति भावः ॥ १२ ॥

द्वे आहुती जुहोत्येते अग्निहोत्रविधानतः ।
ममतां प्रथमं हुत्वाहन्तां च जुहुयात्ततः ॥ १३ ॥

द्वे आहुती जुहोतीति । श्रुति प्रामाण्येन लौकिके गार्हपत्याग्नौ द्वे आहुती प्रक्षिप्येते अतोऽत्राप्येतत्प्रामाण्येनैतदाहुतिद्वयविलक्षणमाहुतिद्वयमाह द्वे इति, अग्निहोत्रविधानत उक्तलक्षणेनाग्निहोत्रविधानेनैते वक्ष्यमाणे द्वे द्विसङ्ख्ये आहुती मुनिर्म-

ननवाञ्जुहोति प्रक्षिपति ते एवार्धेन दर्शयति ममतामिति, प्रथममादौ ममतां ममत्वं हुत्वा प्रक्षिप्य ततोऽनन्तरमहन्तां चाहन्त्वमपि जुहुयात्प्रक्षिपेद्बुद्ध्यादौ शरीरान्तेषु आत्मनस्तादात्म्यबुद्धिं त्यजेदित्यर्थः ॥ १३ ॥

नन्वेतदाहुतिद्वयं जीवस्वरूपे गार्हपत्याग्नौ प्रक्षिप्यते चेत्ततः किं फलं भवेत्तत्राह ।

हुते चेदाहुती एते सर्वमेतद्धुतं भवेत् ।
श्रद्धापत्नीसमेतानां मुमुक्षागृहवासिनाम् ॥१४॥
अग्निहोत्रमिदं नित्यमकृत्य प्रत्यवैति यत् ।
इ० न० बो० मु० होमांगसहितहोमनिर्णयः ॥१३॥

हुते चेदिति । एते उक्तप्रकारे आहुती हुते चेदुक्तलक्षणे गार्हपत्याग्नौ प्रक्षिप्ते यदि ततस्तर्हि एतत्सर्वं दृश्यमानं सर्वं जगद्धुतमग्नावुक्तलक्षणे प्रक्षिप्तं भवेत्स्याद्, नन्विदमग्निहोत्रं न क्वाप्युक्तमित्याशङ्क्य तैत्तिरीयकोपनिषदि 'तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी'त्यादिनोक्तत्वान्नैवमित्याह श्रद्धेति, श्रद्धापत्नीसमेतानां गुरुवेदान्तवाक्येषु विश्वासबुद्धिरेव श्रद्धा सैव पत्नी भार्या तया समेतानां संयुक्तानां मुमुक्षा गृहवासिनां मुमुक्षा मोक्षेच्छा सैव गृहं मन्दिरं तत्र वस्तुं वासं कर्तुं शीलं येषां तेषां 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः, इदमेतदुक्तविधमित्यर्थः, अग्निहोत्रमग्निहोत्राख्यं कर्म कार्यमवश्यकर्तव्यं विहितमित्यर्थः, यदिदं प्रसिद्धं ज्ञान्यग्निहोत्रमकृत्य परित्यज्य प्रत्यवैति प्रत्यवायी भवति अतोऽग्निहोत्रमिदं नित्यं कर्तव्यमिति भावः ॥ १४ ॥ १५ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे होमाङ्गसहितहोमनिर्णयार्थप्रकाशनयोदयः ॥ १३ ॥

अथ ब्रह्मयज्ञनिर्णयः ।

एवं होमनिर्णयं परिसमाप्येदानीं ज्ञानिनां ब्रह्मयज्ञं निर्णेतुं ब्रह्मयज्ञनिर्णयाख्यं प्रकरणं पञ्चश्लोकमभिदधान आह ।

अथ ब्रह्मयज्ञनिर्णयः ।

अथेति । अथ होमनिर्णयानन्तरं ब्रह्मयज्ञो विदुषां ब्रह्मयज्ञो निरूप्यत इति शेषः, तत्र तावल्लौकिकब्रह्मयज्ञे प्रसिद्धहस्तयोः सम्पुटीकरणं विहितं तद्वदत्र ज्ञानिविहितब्रह्मयज्ञे लौकिकहस्तविलक्षणहस्तयोर्लौकिकसम्पुटीकरणविलक्षणं सम्पुटीकरणमाह ।

अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ।
इति पञ्चाङ्गुलिमयो यमनामा तु सत्करः ॥ १ ॥

अहिंसेति । अहिंसा हिंसात्यागः, सत्यं सत्यवचनादिग्रहः, यद्वाऽसद्वस्तुत्यागेन सद्वस्तुग्रहः, अस्तेयं स्तेयं चौर्यं तत्यागः, ब्रह्मचर्यापरिग्रहौ ब्रह्मचर्यमष्टाङ्गमैथुनत्यागरूपम्, अपरिग्रहश्च योगप्रतिकूलविषयासंग्रहः, एतेषां फलान्यपि सूत्रितानि पतञ्जलिना 'अहिंसाप्रतिष्ठायां तत्संनिधौ वैरत्यागः, सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्, अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानं, ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः, अपरिग्रहस्थैर्ये जन्मकथन्ता सम्बोध' इति पञ्चयमफलानि क्रमेण प्रतिपादितानीत्येवं पञ्चाङ्गुलिमयः पञ्च पञ्चसङ्ख्या अङ्गुलयस्तन्मयस्तत्प्रचुरो यमनामा यमान्नामयति स्वाङ्गमुख्यत्वेन प्रगटयतीति यमनामा साङ्ख्याख्यः सत्करः सन्मोक्षार्थोपयोगी करो

हस्तो यमानां साङ्ख्य एव प्रधानत्वात्तुपदेन लौकिकहस्ततोऽस्य हस्तस्य वैलक्षण्यं सूचितम् ॥ १ ॥

द्वितीयं करं निर्दिशति ।

शौचं संतोषः स्वाध्यायस्तप ईश्वरधारणा ।

इति पञ्चाङ्गुलिमयो नियमो नाम सत्करः ॥२॥

शौचमिति । शौचं बाह्यं स्नानादि आन्तरं रागादित्यागरूपमुभयं, सन्तोषो यथालब्धेषु भोगेष्वलंबुद्धिः, स्वाध्यायः स्वात्मनिरूपकवेदांतग्रन्थानां विचारपूर्वकः पाठः, तपः स्वस्ववर्णाश्रमविहितकर्माचरणनिमित्तं शीतवातादिक्लेशसहनरूपं स्वरूपप्राप्तिमाधननिमित्तं क्लेशसहनमिति च द्विविधम्, ईश्वरधारणा सर्वत्रास्तिभातिप्रियरूपेण सच्चिदानन्देश्वरप्रतीतिरूपा तद्व्यतिरिक्तनामरूपासत्त्वनिश्चयपूर्विका, इत्येवं पञ्चाङ्गुलिमयः पञ्च पञ्चसङ्ख्या अङ्गुलय इवाङ्गुलयः करशाखास्तन्मयस्तत्प्रधानो नियमो नाम नियम इति प्रसिद्धो योगे नियमानां प्राधान्यान्नियमप्रधानाङ्गैरुपलक्षितो योग इत्यर्थः, सत्करः सन्मोक्षरूपार्थसाधनभूतः करो हस्तोऽस्ति । एतेषामपि फलानि सूत्रितानि पतञ्जलिना 'शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः, सत्त्वशुद्धिः सौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि चेति; संतोषादनुत्तमसुखलाभः, कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः, स्वाध्यायादिष्टदेवतासंप्रयोगः, समाधिसिद्धिरीश्वरप्रणिधानाद्' इति क्रमेण नियमानां फलानि ज्ञेयानि ॥ २ ॥

एवमङ्गुलिभिरुपलक्षितौ हस्तौ निर्णीय तयोः सम्पुटीकरणं विशिष्टमाह ।

संपुटीकृत्य हस्तो द्वौ मुनिर्नियमसंयमौ ।

ब्रह्मस्तुतिमयं साक्षाद्ब्रह्मयज्ञं समाचरेत् ॥ ३ ॥

सम्पुटीकृत्येति । मुनिर्ज्ञानी नियमसंयमौ नियमाः पञ्च प्रोक्तास्तदुपलक्षितो योगः संयमश्चोक्तपञ्चयमोपलक्षितश्च साङ्ख्यस्तौ द्वौ द्विसङ्ख्यौ हस्तौ करौ द्वैतत्यागाद्वैतग्रहणसाधनौ सम्पुटीकृत्यान्योन्यानुकूल्येनाखण्डैकरसवस्तुपर्यवसितौ कृत्वा साक्षाद्वाच्यार्थत्यागेन प्रत्यक्षं यथा भवति तथा ब्रह्मस्तुतिमयं ब्रह्मणः सच्चिदानन्दरूपस्य स्तुतिः प्रशंसा यत्र वाक्ये तन्मयं तत्प्रधानं वाक्यार्थावृत्तिरूपं ब्रह्मयज्ञं ब्रह्मेज्यतेऽनेनेति ब्रह्मयज्ञो वेदान्तपाठस्तं चरेत्कुर्यात् ॥ ३ ॥

नन्वीदृशब्रह्मयज्ञनिरूपणे किंप्रमाणमित्याशङ्क्याह ।

तदुक्तं पातंजले ।

तदिति । तद्ब्रह्मयज्ञाख्यं कर्म पातञ्जले पतञ्जलिप्रणीते योगशास्त्र उक्तं कथितं केन वाक्येनेत्यपेक्षायां तद्वाक्यमुदाहरति।

'स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामनेत् ।

योगस्त्वध्यायसंपत्त्या परमात्मा प्रकाशत' इति ॥४॥

स्वाध्यायादिति । स्वाध्यायात्स्वस्यात्मनोऽध्यायः प्रतिपादको ग्रन्थो वेदान्तशास्त्रं तत्पाठः कर्तव्यस्तस्मिंश्चित्तस्यौदासीन्यमालक्ष्य ततः योगं चित्तवृत्तिनिरोधमासीताभ्यसेत्तत्रापि चित्तस्यौदासीन्यमालक्ष्य योगाद्योगाभ्यासाच्चितं निवर्त्य स्वाध्यायं स्वस्यात्मनः प्रतिपादकं शास्त्रमामनेद्विचारयेत्कामादिवृत्तीनामवसरं न दद्यादिति भावः ॥ १० ॥

एवं कृते किं स्यात्तदाह ।

वेदशास्त्रपुराणेषु यद्यत्पुण्यफलं स्मृतम् ।

सर्वस्मादपि संप्रोक्तं ब्रह्मयज्ञफलं महत् ॥ ५ ॥

इति श्रीनर० बोध०मुनीन्द्र० ब्रह्मयज्ञनिर्णयः ॥ १५ ॥

योगेति। योगस्वाध्यायसंपत्त्या योगश्चित्तवृत्तिनिरोधलक्षणः स्वाध्यायश्च विचारपूर्वकं वेदान्तपाठस्तयोः सम्पत्त्या सिद्ध्या सम्पादनेनेत्यर्थः, परमात्मा कार्यकारणातीत आत्माऽखण्डैकरस आत्मा प्रकाशते स्वयमेव प्रकाशितो भवतीतीत्थं पातञ्जले प्रोक्तमस्तीत्यर्थः ॥ ४ ॥

एतस्य विद्वद्ब्रह्मयज्ञस्य फलमाह ।

वेदेति। वेदशास्त्रपुराणेषु वेदः स्वतः प्रमाणत्वेनान्यप्रमाणनिरपेक्षोऽपौरुषेयवाक्यकदम्बरूपः शास्त्राणि मुनिप्रणीतानि वेदार्थप्रतिपादकानि वेदान्तमीमांसादीनि पुराणानि च व्यासादिप्रणीतानि भागवतादीनि सेतिहाससयुक्तिकवेदशास्त्रार्थसंग्राहकाणीत्यर्थः, तेषु विचारपूर्वं पठितेषु सत्सु यत्र यत्र तत्रोक्तं पुण्यफलं पवित्रकारकं फलं प्रयोजनं स्मृतं कथितं तस्मात्सर्वस्मादपि फलात्समूहीभूताद्ब्रह्मयज्ञफलमेतस्य विद्वद्विहितब्रह्मयज्ञस्य फलं प्रयोजनमात्मप्राप्तिरूपत्वान्महच्छ्रेष्ठं संप्रोक्तं कथितमतोयमेव ब्रह्मयज्ञः कर्तव्यो विद्वद्भिरिति भावः ॥ ५ ॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे ब्रह्मयज्ञनिर्णयार्थप्रकाशः पञ्चदशः ॥ १५ ॥

अथ तर्पणनिर्णयः।

एवं मुनीनां ब्रह्मयज्ञं निरूप्येदानीं तत्प्रसङ्गात्तेषामेकश्लोकं तर्पणनिर्णयाख्यं प्रकरणं निरूपयन्नाह ।

अथ तर्पणनिर्णयः ।

अथेति। अथ ब्रह्मयज्ञनिर्णयनिरूपणानन्तरं तर्पणनिर्णयस्तर्प-

शस्य मुनीन्द्रतर्पणस्य निर्णयो निश्चयः क्रियत इति शेषः, तमेवाह।

देवर्षिपितृभूतेभ्यो दत्तो येन जलाञ्जलिः।
ब्रह्मैवास्मीतिमंत्रेण तर्पणं तत्सुतर्पणम् ॥ १ ॥

इति श्रीनरहरिकृतौ बोधसारे मुनींद्रदिनचर्यायां तर्पणनिर्णयः ॥१६॥

देवर्षीति। देवर्षिपितृभूतेभ्यो यथा लोके देवर्षिपितृभूतेभ्यो जलाञ्जलिर्दीयते तद्वदत्रापि देवा इन्द्रियाधिष्ठातारः समष्टिव्यष्टिरूपा ऋषयश्च ब्रह्मादयः पितरश्चाग्निष्वातादयः स्वपितरश्च भूतानि वियदादीनि भौतिकाः प्रेतादयश्च सर्वे प्राणिनस्तेभ्यो ब्रह्मैवास्मीतिमन्त्रेणाहं सच्चिदानन्दलक्षणस्योभयोरविशिष्टत्वाद्ब्रह्मास्मि भवामि नान्योऽहंपदवाच्यो जीवोस्मीत्यर्थानुसन्धानपूर्वकमनेन मन्त्रेण कृत्वा जलाञ्जलिर्जडस्य जडभागस्योभयोः पदयोर्वाच्यांशस्य विरुद्धस्याधेयाधारत्वेन सम्बन्धरूपोञ्जलिः साङ्ख्ययोगहस्तयोरेकार्थपर्यवसानरूपोऽञ्जलिर्दत्तः समर्पितः स्वसम्बन्धं परित्यज्य देवर्षिपितृभूतसम्बन्धत्वेनानुभूत इत्यर्थः, तन्निषेधस्यापि तत्सम्बन्धवत्त्वमेवेति भावः, तदेतदज्ञानिनां परोक्षमपि ज्ञानिनां त्वपरोक्षमित्यर्थः, तर्पणं तृप्तिजनकं कर्म सुतर्पणं नित्यतृप्तिजनकं नान्यदनित्यतृप्तिजनकमतो विद्वद्भिरेतदेव कर्तव्यमिति भावः ॥१॥

इति श्रीनरहरिशिष्यदिवाकरविरचितायां बोधसारार्थदीप्तौ मुनीन्द्रदिनचर्यार्थप्रकाशे तर्पणनिर्णयार्थप्रकाशः षोडशः ॥ १६ ॥

अथ देवपूजानिर्णयः।

एवं तर्पणं निरूप्येदानीं मुनीनां देवपूजां वक्तुं देवपूजानिर्णयाख्यं चतुर्दशश्लोकं प्रकरणं निरूपयन्नाह।

अथ देवपूजाचतुर्दशीः ।

अथेति । अथ तर्पणनिरूपणानन्तरं देवपूजाचतुर्दशी देवपूजायाश्चतुर्दशी चतुर्दशश्लोकसमाहाररूपं प्रकरणं निरूप्यत इति शेषः । तत्र तावज्ज्ञानिनां पूजां निरूपयितुं तत्पूज्यदेवतातत्त्वानुसन्धानं कृत्वा पूज्यपूजानिरूपणं प्रतिजानीते ।

मायाशक्तिविलासतो नगणितब्रह्माण्डभाण्डोदरे
क्रीडाकौतुकसंभ्रमात्मकमपि प्रत्यक्प्रकाशात्मकम् ।
ध्यात्वा किंचिदचिन्त्यचिद्घनरसं स्वानंदसत्ताद्वयं
सिद्धांतस्वरसेन पूजनविधिं वक्ष्यामि विश्वात्मनः॥१॥

मायेति । मायाशक्तिविलासतो मायानाम्नी शक्तिर्जगज्जननसामर्थ्यरूपा तस्या विलासतो विलासरूपे सप्तम्यन्तात्तसिल्, नगणितब्रह्माण्डभाण्डोदरे नगणितानि अनन्तानि यानि ब्रह्माण्डरूपाणि भाण्डानि पात्राणि तेषामुदरे जठरे क्रीडाकौतुकसंभ्रमात्मकमपि क्रीडायां विलासे यत्कौतुकमाश्चर्यं तस्य संभ्रम आवेशः स एवात्मा स्वरूपं यस्य तत्तादृशमपि लौकिकदृष्ट्या तादृशं प्रतीतमपीत्यर्थः, प्रत्यक्प्रकाशात्मकं प्रत्यक्सर्वप्रकाशकत्वेनान्तश्चित्प्रकाशः स आत्मा स्वरूपं यस्य तत्तथोक्तमस्तीति शेषः, तद्धेन किञ्चित्सत्त्वासत्त्वादिना केनापि प्रकारेण निर्देशानर्हमचिन्त्यचिद्घनरसं स्वानन्दसत्ताद्वयं न चिन्त्यश्चिन्तनस्य ध्यानस्य विषयो भवितुमर्हः स चासौ चिदेव चिन्मात्रं तद्रूपेण घनः सघनो निविड इत्यर्थः, रसः सारो यत्र स तादृश आनन्दः स्वरूपभूत आनन्दस्तस्य सत्ता मात्रस्तयाऽद्वयं भेदरहितमिष्टदेवतास्वरूपं ध्यात्वा चिन्तयित्वा तद्देवाहमित्यनुभूयेत्यर्थः, अहं सिद्धान्तस्वरसेन सिद्धान्तः सर्व-

वेदान्तलक्ष्यो य स्वरस आत्मस्वरूपसुखं तेनैव केवलं वि-
श्वात्मनः सर्वात्मशिवस्य पूजनविधिं पूजनस्यार्चनस्य विधिं
प्रकारं वक्ष्यामि कथयिष्यामि ॥ १ ॥

एवं प्रकारनिरूपणं प्रतिज्ञायेदानीं विशिष्टमावाहनं लक्षयति ।

सेव्यः श्रीगुरुवेदवाक्यजनिताश्चिद्बोध आवाहनं
सर्वव्यापकताविनिश्चयमतिः पूर्णं पवित्रासनम् ।
त्वत्तोनान्यदवैमि किंचिदिति तत्पुण्याम्बु पादोदकं
त्वय्येवास्त्वचला ममेश मतिरित्यर्घोस्तु ते सुंदरः॥ २॥

सेव्य इति । श्रीगुरुवेदवाक्यजनितः श्रीगुरोर्वैराग्याद्यै-
श्वर्ययुक्तस्य गुरोर्देशिकस्योपदेशवाक्यैर्वेदवाक्यैः कृत्वा ज-
नित उत्पन्नश्चिद्बोधश्चितश्चिन्मात्ररूपस्यात्मनो बोधो ज्ञानं
सेव्योऽङ्गीकार्यः सोऽङ्गीकार एवात्र ज्ञानिपूजायामावाहन-
मावाहनरूपोपचारो भवतीति शेषः, एवमावाहनमुक्त्वाऽऽसन-
माह सर्वेति, सर्वव्यापकताविनिश्चयमतिस्तस्यैवात्मशिवस्य सर्वत्र
व्यापकताऽस्तिभातिप्रियरूपेण विद्यमानता तस्या विनिश्चयो-
ध्यवसायस्तद्रूपा मतिर्मननरूपान्तःकरणवृत्तिः पूर्णं तत्र स्था-
तुर्देवस्यात्मशिवस्य योग्यं पवित्रासनं पवित्रं निर्मलमासनं ज्ञेयं,
पाद्यमाह त्वत्त इति, त्वत्तः सच्चिदानन्दरूपादात्मनोऽन्यद्भिन्नं
किञ्चित्किमपि नावैमि न जानामीत्येतद्यज्ज्ञानं तदेतस्यां पू-
जायां पुण्याम्बु अन्तःकरणोपाधिमलनिवर्तकत्वात्पुण्यं पवित्र-
मम्बु जलं पादोदकं पादाभ्यामङ्घ्रिभ्यामुदकं जलं पाद्यमि-
त्यर्थः, ज्ञेयम, अर्घ्यमाह त्वयीति, हे ईश हे शिव ममान्तःकरणा-
वच्छिन्नस्य साधिष्ठानचिदाभासस्य मतिर्मननरूपा वृत्तिस्त्वय्येवो
पाधिं निरस्याखण्डैकरसे भवतु केवलमस्तु स्यादिति

एवं प्रकारा प्रार्थनरूपा वृत्तिः सुन्दरः सुखजनकत्वात्कमनीयस्ते स्वात्मशिवार्थमर्घोऽर्घ्यमस्तु भवतु ॥ २ ॥

मधुपर्कमपि विशिष्टमाह ।

शीतोष्णं कटुतिक्तमम्लमधुरं क्षारं विचित्रं रसै
र्यत्तस्यास्य समत्वभावमधुना पर्कः कृतश्चेद्यदि ।
मुख्योयं मधुपर्क उत्तमरसस्तेनामुना सादरं
पूज्यानामपि पूज्य एष परमो देवः सदा पूज्यताम् ॥ ३ ॥

शीतोष्णमिति । रसैः सुखविशेषैः शीतोष्णं शीतं शीतगुणवदुष्णं च तापकं समाहारे एकवद्भावस्तथा कटुकषायरसवत्तिक्तं तीक्ष्णरसवदम्लमधुरमम्लमम्लरसवन्मधुरं मधुररसवद्गुडादिकमत्रापि समाहारैकवचनं क्षारं क्षाररसवद्यत्पदार्थजातं तदाकारमन्तःकरणं च विचित्रं विचित्ररसवत्प्रतीयते तस्योक्तस्यानेकरससहितस्यान्तःकरणस्यास्य साक्षिणो मम प्रकाशस्य समत्वभावमधुना समत्वमस्तिभातिप्रियरूपेण समत्वान्नामरूपयोरपि पृथगसत्त्वाच्च सर्ववस्तुनस्तदाकारान्तःकरणस्य च समत्वं तस्य भावो भावना तदेवोत्कृष्टपारमार्थिकरसरूपत्वान्मधु तेन पर्कः लेपः स्वात्मशिवे कृतः सम्पादितो यदि चेद्यदि भवेत्तर्हि अयं विवेकिनां प्रसिद्ध उत्तमरस उतम उद्गतं निवृत्तं तमोऽज्ञानं तत्कृतमावरणं च यस्मात्तथाभूतो रसः सुखं यत्रात एव मुख्यः प्रधानो मधुपर्कः मधुना पर्को लेपो भवति तेनोक्तलक्षणेनामुना मम साक्षिणः प्रत्यक्षेण मधुपर्केण पूज्यानामपि पूज्याः सर्वजगत्पूज्या ब्रह्मादयस्तेषामपि पूज्यः पूजा परिचर्या तदर्ह एष प्रत्यक्परोक्षरहितो ब्रह्माभिन्नप्रत्यगात्मरूपः परम कार्यकारणरहितो

देवश्चित्स्वरूप आत्मा सदा सर्वावस्थासु निरन्तरमित्यर्थः, पूज्यानां पूज्यः ॥ ३ ॥

एवं मधुपर्कं निरूप्य स्नानमाह।

सर्वाङ्गीणसुखावहं मुहुरहो यज्जन्मनो मज्जनं
शुद्धे बोधसुधाम्बुधौ शुचितरे स्नानं विशुद्धिप्रदम्।
आभानं स्फुरति द्वितीयमिव यत्तत्सर्वमाचम्यता
मित्युक्तो गुरुभिस्तदेष विधृतश्चित्ते स एवाचमः॥४॥

सर्वाङ्गीणेति। यत्प्रसिद्धं ज्ञानिनां जन्मनः जन्मकारणादज्ञानात्तत्कार्याज्जीवत्वाच्च निःसृतेनेति शेषः, शुद्धे कार्यकारणातीते शुचितरेऽन्तःकरणस्यातीवशोधकत्वात्स्वतश्च मायाविद्यामलरहितत्वाच्चातीव शुद्धे 'न हि ज्ञानेन सदृशं पवित्रमिह विद्यते' इति स्मृते र्बोधसुधाम्बुधौ बोधो जीवात्मैक्यज्ञानं महावाक्यजन्यमहं ब्रह्मास्मीतिसाक्षात्काररूपं स एव सुधाऽमृतं सुखरूपं जलस्थानीयं तस्याम्बुधिः समुद्र इवाधारः स्वरूपानन्दस्तस्मिन्स्नानमवगाहनं मुहुर्भूयो भूयस्तत्सर्वाङ्गीणसुखावहं सर्वं सर्वपदवाच्यं द्वैतं तदेवाङ्गं शरीरं तत्र भवं सर्वाङ्गीणं यत्सुखं तस्यावहं प्रापकं द्वैतजातेऽपि आत्मसुखप्रतीतिकारकमित्यर्थः, अहो इत्याश्चर्ये, स्याद्भवेद्विशुद्धिप्रदमन्तःकरणमलनिवृत्त्यात्यन्तशुद्धिकरं भवति, आचमनमाह आभानमिति, द्वितीयमिवात्मभानादन्यदिव यत्प्रसिद्धमाभानमा—ईषद्भानं चिदाभासरूपं जगत्प्रकाशकं स्फुरति भासते तत्सर्वमाचम्यतां तत्सकलमपि प्राश्यतामात्मनः पृथङ्नास्तीत्येवं बाध्यतामित्यर्थः, इत्येवंप्रकारेण गुरुभिर्महावाक्यार्थोपदेष्टृभिरुक्त उपदिष्टस्तदेष उक्तलक्षण उपदेश श्चित्ते चेतसि विधृतोऽङ्गीकृतः

स एवाऽस्यां पूजाया माचम आचमनं भवति ॥ ४ ॥

वस्त्राण्यलङ्कारांश्चाह ।

श्रद्धा निर्ममता विरागशुचिता निःसङ्गता पूर्णता
भक्तिप्रेमरसप्रसादपरमानन्दादयो ये गुणाः ।
वस्त्रालङ्करणानि तत्र विदुषा देयानि विश्वम्भरे
सोहंभावमनोहरेण विधिना यद्यद्यथा रोचते ॥५॥

श्रद्धेति । श्रद्धा गुरुवेदान्तवाक्येषु विश्वासबुद्धिर्निर्ममता ममत्वराहित्यं विरागशुचिता विरागेण वैतृष्ण्येन सहिता शुचितान्तःकरणनिर्मलत्वं निःसङ्गताऽलिप्तत्वं पूर्णता व्यापकत्वानिश्चयो भक्तिप्रेमरसप्रसादपरमानन्दादयो भक्तिः साकारध्यानसेवादिरतिः प्रेमरसो निरतिशयसुखात्मविषयकनिरतिशयस्नेहसुखं प्रसादः प्रसन्नता परमानन्द आत्मसुखानुभव एतदादयो ये योगिषु प्रसिद्धा गुणाः सत्त्वगुणाद्वृत्तयः सन्ति ते सर्वे विदुषा ज्ञानिना वस्त्रालङ्करणानि वस्त्राणि अलङ्काराश्च तत्र तस्मिन्विश्वम्भरे जगदाधारे आत्मनि यद्यद्वस्त्रं वाऽलङ्करणं वा तदन्यत्किमपि सुगन्धादि द्रव्यं वा यथा यद्वद्रोचते प्रियं भवति तत्तत्तथा सोहंभावमनोहरेण स इति परोक्षः परमात्माऽहमहंपदलक्ष्यः प्रत्यक्ष आत्मा तयोः प्रत्यक्परोक्षतात्यागेन भागलक्षणया लक्षितमखण्डैकरसात्मानुभवपूर्वकं तदर्थप्रतिपादकेन सोहमितिमन्त्रेण मनोहरेण मनःप्रीतिकरेण विधिना विधानेन देयानि समर्प्याणि ॥ ५ ॥

चन्दनमाह ।

अद्वैतप्रतिपत्तिरात्मविषया सा सामरस्याञ्चिता
गात्रालेपनचारुचन्दनमिदं देवस्य देयं प्रियम् ।

शान्तिः क्षान्तिरलोलता सरलता निर्मत्सरत्वादयः
शास्त्रार्था यदि न क्षताश्च वितुषाः शुद्धास्त एवाक्षताः॥ ६॥

अद्वैतेति । आत्मविषयाऽऽत्मा ब्रह्माभिन्नः प्रत्यगात्मा विषयो गोचरो यस्याः सा तथोक्ताऽद्वैतप्रतिपत्तिरखण्डैकरसात्मानुभूतिः सोक्तलक्षणा सामरस्याञ्चिता सामरस्यं द्वैताद्वैतभेदनिरासेनैकरस्येनाञ्चिता युक्ता चेद्भवति तर्हीदमुक्तलक्षणं विद्वत्प्रसक्षं गात्रालेपनचारु गच्छति लयमिति गा जगद्दृष्टिस्तां त्राति रक्षतीति गात्रं सच्चिदानन्दघनं तस्यालेपनं लक्ष्यलक्षकत्वेन किञ्चित्सम्बन्धार्हं तेन चारु सुन्दरं चन्दनमाल्हादकं देवस्य चित्स्वरूपस्य प्रियमिष्टं देयं समर्पणीयम्, अक्षतानाह शान्तिरिति, शान्तिरन्तःकरणनिर्त्रासनता क्षान्तिः सहनताऽलोलतान्तःकरणस्य स्थैर्यं सरलता निष्कापट्यं निर्मत्सरत्वमीर्ष्यारहितत्वमादि प्रथमं येषां तेऽक्रोधादयस्ते शास्त्रार्थाः शास्त्राणां वेदान्तादीनामर्थास्तात्पर्याणि यदि यर्हि न क्षता वेदान्तानुकूल्येनाखण्डमनुसन्धिताः स्युश्चेत्तर्हि ते एवात्रास्यां पूजायां वितुषा भेदतुषरहिता अत एव शुद्धा निर्मला अक्षता अबाधितत्वादक्षता ज्ञेयाः ॥ ६ ॥

पुष्पाण्याह ।

संफुल्लैर्निजभावशुद्धकुसुमैः सद्वासनासुन्दरैः
संपूज्यो हि महेश्वरः सुमनसां सा धन्यता वर्णिता ।
कर्मज्ञानमयो यदिन्द्रियगणः क्षिप्तो विरागानले
देवस्यास्य दशाङ्गदाहसुरभिर्धूपः सदा वल्लभः॥ ७॥

संफुल्लैरिति । संफुल्लैः प्रसन्नतासहितैः सद्वासनासुन्दरैः

विज्ञापनम् ।

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ।।।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ४ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्ड ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्ड १)	४	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०